M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. 822

Title: Vritta Dipika

822

वृत्तिदीपिका (वेदान्त)

Vritti Deepikā		: Title
	Krishna Bhatta	: Author
		: Editor
		: Year, Vols.
	Saka 1722	: Publisher
		: Remarks
822		

श्रीगणेशायनमः सजलजलदकालंसर्वलोकैकपालंव्रजयुवतिरसालंचंदनाभ्यक्तभालं विहतदुरितजालंविश्वरा
जीवनालंविलसितवनमालंनौमिगोपालबालं १ ध्यात्वाव्यासंगुरुंनत्वामाधवेंद्रसरस्वतीं मौनिश्रीकृष्णभट्टे
नतन्यतेवृत्तिदीपिका २ इहसकलजनाभिलषितमोक्षसुखोपायात्मज्ञानस्यतत्त्वमस्यादिमहावाक्या
र्थबोधजन्यत्वाच्छाब्दबोधेचवृत्तिग्रहजन्योपस्थितेर्हेतुत्वाद्वृत्तिर्निरूप्यते सात्रिधा वृत्तिर्लक्षणाव्यंजना
च वृत्तित्वंचशाब्दबोधहेतुशब्दार्थोपस्थित्यनुकूलशब्दतदर्थसंबंधत्वम् संकेतविशेषसंबंधेनवृत्तिपदत्वं
वा तत्रशक्तिः कः पदार्थ इतिचेत् संकेतजन्यग्रहविषयमभिधानांअपदार्थांतरमितिमीमांसकाः संके
तश्च एतत्पदजन्यत्वप्रकारतानिरूपितएतदर्थबोधविशेष्यताशालीश्वरेच्छा नैयायिकास्तु लाघवात्संके
तएवाभिधानंतुपदार्थांतरं नचगगर्यादिशब्दा अपिअभिधायकाःस्युः तथाचनम्लेच्छितवैनापभा
षितवैइत्यादिश्रुतिविरोधः तत्रसंकेतसत्त्वेपिशास्त्रनिष्णातबुद्धीनांगगर्यादिशब्दाच्छास्त्रेष्वरूपफला
भावेनापभ्रंशोतादृशेश्वरसंकेताभावात् ननुशाब्दबोधेशक्तिज्ञानस्यहेतुतायाअपभाषितेशक्त्यभावे
कथंशाब्दबोधइतिचेन्न शक्तिभ्रमात् भ्रमप्रमासाधारणशक्तिज्ञानत्वेनहेतुत्वात् ननुचैत्रशब्दादयम
र्थोबोद्धव्यइत्यास्माकीनेच्छाविषयाणांचैत्रादिशब्दानामीश्वरसंकेताभावेनाशक्तत्वापत्तिः द्वादशाहेका
लीनपितरितन्मत्वादिनानामवाच्यइत्याकारकेच्छयेश्वरेणतादृशश्रुतिप्रणयनात्तत्रापीश्वरसंकेतोस्ती
तिबोध्यम् ईश्वरीयज्ञानस्येच्छायाःकृतेर्वाशक्तिरूपत्वमितिविनिगमनाविरहादतिरिक्तैवशक्तिरितिन
व्याः अन्यतरपक्षपातिनीयुक्तिर्विनिगमना मिश्रास्तुतादृशेच्छयाभगवदुच्चरितत्वंशक्तिः अपभ्रंशा

वृत्तिदी॰ इयत्तुनाताद्दृशेच्छयेश्वरोच्चारिताइतिनतेषुशक्तिरित्याहुः तन्न वेदस्थलाक्षणिकेषुयजमानःप्रस्तरइत्यादिषुशक्त्या
पत्तेः तादृशेश्वरसंकेतितत्वंचसाधुत्वम् केचित्तुवृत्तिमत्त्वंसाधुत्वमित्याहुः अत्रेदंवक्तव्यम् सन्मात्रविषयिण्याई
श्वरेच्छायाः अपभ्रंशेपिसत्वेनतत्रापिशक्तिरिष्टैव यत्तुशास्त्रनिषिद्धत्वबुद्धीनांगगर्यादिशब्दाच्छाब्दरूपफलाभावे
नापभ्रंशेतादृशेश्वरसंकेतोनास्तीत्यूचुः तन्न साधुस्मरणंविनापिव्युत्पन्नानांबोधानुभवात् भवदुक्तसंस्कृतेर
यमर्थोनबुद्धः किंतुएतदुक्तभाषयेतिव्युत्पन्नानामपिव्यवहाराच्च एतेनअपभ्रंशेभ्यः साधुस्मरणादर्थबोधइत्य
पास्तम् अव्युत्पन्नानांशक्तिभ्रमाद्बोधइत्यपिन यत्तत्पदार्थघटितेश्वरेच्छायाघटादिपदवृत्तित्वेनगृहीतायाः विशि
ष्टानुपूर्विकत्वरूपविशेषदर्शनसत्वेनसाधारणधर्मदर्शनाभावेनचगगरीपदादौभ्रमानुपपत्तेः यथाशुक्तित्वेनशु
क्तिज्ञानाभावेचाकचिक्यादिदर्शनेचरजतभ्रमः अथवास्तुयथाकथंचिच्छक्तिभ्रमः सकस्यसर्वव्यवहारकर्तुरी
श्वरस्यउततदतिरिक्तस्यवा नाद्यः भ्रमत्वानुपपत्तेः नांत्यः सर्गादौतदतिरिक्तव्यवहारकर्तुरभावात् नचसक
लदेशशिष्टपरिगृहीतत्वाभावान्नतत्रशक्तिरितिवाच्यम् दुश्च्यवनशब्दस्येंद्रेशक्त्यनापत्तेः शिष्टैस्तदप्रयोगात्
अतएवप्रकाशकृद्दुश्च्यवनादिशब्दानप्रयुक्तदोषावसरेउदाजहार यदपिसंकेतितत्वंसाधुत्वमित्याद्युक्तं तद
पिन भवन्मतेसप्रासादौप्रकृतिप्रत्ययसमुदायेचशक्त्यभावेनासाधुतापत्तेः प्रत्येकशक्तिमादायसाधुत्वेचबा
धतेइत्यादिवद्बाधतीत्यस्यापिसाधुतापत्तेः द्योतकेष्वव्याप्तेश्च ओपसंदानिकीशक्तिरेवद्योततेतिचेत् उप
संदीयतेइत्युपसंदानंसमभिव्याहृतं तत्तद्वृत्तिशक्त्युद्बोधकत्वमितितदर्थसत्वेननिपातेषुशक्त्यभावात्
लाक्षणिकानामसाधुतापत्तेः नचतेषामपिकश्चिच्छक्तिसत्वादस्त्येवसाधुत्वमितिवाच्यं गोणीशब्दस्यगो=
ण्यांशक्तिसत्वेनगव्यपिसाधुत्वोपपत्तेः ननुकिमिदंसाधुत्वं यःशब्दोयत्रार्थेव्याकरणव्युत्पन्नःसतत्रार्थे १

साधुः तद्व्युत्पन्नत्वग्रहश्च क्वचित्स्पष्टोपलभ्यमानव्याकरणात् क्वचिच्छिष्टप्रयोगकोशादिभिरनुमानात् तस्यचबा
हुलकादिनासंग्रहः एवंलाक्षणिकेपि यद्वालक्षणास्थलेप्रथमंशक्यार्थबोधस्यावश्यकतयातमर्थमादायसाधु
त्वोपपत्तेः अतएवगंगापदस्यतीरपरत्वेपिप्रथमोपस्थितांतरंगार्थमादायस्त्रीप्रत्ययादिसंगच्छते एतादृशसाधु
त्वज्ञानस्यनशाब्दबोधेकारणत्वम् तदजानतामपिबोधात् नवासाधुत्वनिश्चयस्यप्रतिबंधकत्वम् तत्सत्वेपिसं
स्कृतमविदुषांप्राकृतादितोपिबोधात् विदुषामपिअपिपिबुद्धींजलकुंभमित्यादिभाषातः बोधस्यसर्वानुभवसि
द्धत्वाच्च नचेदृशसाधुत्वस्यकोपयोगः एकः शब्दः सम्यक्ज्ञातः सुप्रयुक्तः स्वर्गेलोकेकामधुक्साधूनेवप्रयुं
जीतेत्यादिबोधितपुण्यजननेतदुपयोगः एवंचपुण्यजनकतावच्छेदकंतत्तदर्थव्याकरणव्युत्पाद्यत्वंसाधुत्वमि
तिफलितं यद्वाव्याकरणव्यंग्यशब्दनिष्ठपुण्यजनकतावच्छेदकोजातिविशेषः साधुत्वं भाष्येतथैवाभिधानात्
वैयाकरणास्तुबोधकत्वमेवशक्तिः तच्चबोधजनकत्वमिंद्रियादिवत् अतएवविवरणेप्युक्तं बोधजननसाम
र्थ्यमेवशब्दस्यार्थेनसंबंधइति नतुअस्मात्पदादयमर्थोबोद्धव्यइत्याकारिकाचेश्वरेच्छाज्ञानंकृतिर्वाविनिग
मनाविरहेणसर्वेषांतत्वेगौरवात् अतिरिक्तेसत्यपिन अतिरिक्तपदार्थस्याश्रयभेदेनविषयभेदेनचभिन्न
त्वेनानंतपदार्थकल्पनायांगौरवस्यस्पष्टत्वात् नचैवंगंगापदस्यतीरबोधकत्वेनतीरेपिशक्त्यापत्तेः तथा
चलक्षणोच्छेदापत्तिरितिचेत् इष्टापत्तेः यथानैयायिकैर्लाघवात्सर्वानुभवसिद्धापिव्यंजनालक्षणयैवनिर्वाहे
अतिरिक्तास्वीक्रियतेतथास्माभिरपितत्तच्छाब्दबुद्धित्वावच्छिन्नंप्रतिबोधजनकत्वेज्ञानजन्योपस्थिति
त्वमेवकारणतेत्येकएवकार्यकारणभावइतिलाघवाल्लक्षणानस्वीक्रियते लक्षणापक्षेतुशक्तिजन्योप
स्थितेर्लक्षणाजन्योपस्थितेश्चकारणत्वेकार्यकारणत्वेकार्यकारणभावद्वयम् तथापदार्थोपस्थितिंप्र
त्यपिशक्तिज्ञानत्वेनलक्षणाज्ञानत्वेनहेतुनावाच्येतिगौरवम् अथवृत्तिजन्योपस्थितित्वेनैवशाब्द
बोधेहेतुतावृत्तित्वज्ञानत्वेनचपदार्थोपस्थितिकारणतेतिनानेकतत्कल्पनागौरवमितिचेत् वृत्तित्वं

९ इदंपदमिममर्थंबोधयत्विच्छाकारिका ९

शक्तिदी· शक्तिलक्षणान्यतरत्वं शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदार्थसंबंधत्वं वा न कारणतावच्छेदकम् श
क्तित्वमपेक्ष्य गौरवात् यदित्वप्रसिद्धशक्यसंबंधित्वेन गृहीतार्थविषयबोधजनकत्वं लक्षणात्वेन
२ व्यवह्रियते प्रसिद्धार्थविषयतच्छक्तित्वेनेति शक्तिलक्षणयोर्भेदं ब्रूषे तर्हि लक्षणातस्तात्पर्यानुपपत्ति
ज्ञानाभावरूपस्य भेदकस्य व्यंजनायां सत्वेन तत्स्वीकार आवश्यकः तस्सिद्धं शब्दनिष्ठतत्तदर्थविषय
कधीजनकत्वमेव शक्तिः ननु शब्दसामान्ये शक्तिज्ञानस्य हेतुत्वात्तज्ज्ञानं कथमिति चेत् शक्तिग्रहं व्याक
रणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इति
प्राचीनगाथोक्तव्याकरणादितः इति गृहाण तत्र मुख्यो व्यवहारः तत एव शक्तिग्रहः व्यवहारस्तु सर्गादौ ईश्व
रेण च प्रयोज्यप्रयोजकवृद्धः स व्यवहरति तेन तटस्थो बाल आवापोद्वापाभ्यां घटमानय पटं नयेत्येवंरूपा
भ्यां घटादिपदे शक्तिं गृण्हाति आवापः संग्रहः उद्वापस्त्यागः प्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकर
णात् गोसदृशो गवयपदवाच्य इत्युपमानात् अप्येकदंतहेरंबलंबोदरगजाननाः इत्यत्र गणेशत्ववि
शिष्टे शक्तिग्रहः कोशात् नन्वत्र विरूपाणामपि समानार्थानामित्येकशेषापत्तिः कोशोपदानामेव पदा
र्थतया समानार्थत्वाभावात् कोकिलः पिकपदवाच्य इत्याप्तवाक्यात् पिकपदादौ कोकिले शक्तिग्रहः
यवसपश्चकर्मवतीत्यत्र यवशब्दे म्लेच्छप्रसिद्धिवशात् कंगौ वाचकः आर्यव्यवहारात् दीर्घशूकविशि
ष्टस्य वाचकः व्यवहारस्योभयत्राविशेषादिति संदेहे वसंते सर्वसस्यानां जायते पत्रशातनं मोद
मानाश्च तिष्ठंति यवाः कणिशशालिनः इति वाक्यशेषाद्दीर्घशूकविशिष्टे शक्तिनिर्णयः पचति पाकं
करोतीति विवरणात् सहकारतरौ मधुरं पिको रौतीत्यत्र सहकारतरुरूपप्रसिद्धपदसमभिव्याहारेण पि
कपदस्य कोकिले शक्तिग्रहः ननु शाब्दबोधे शक्तिग्रहः सहकारी तथा च घटपदस्य घटे शक्तिग्रहात् पट २

प्रत्ययोऽपि स्यात् ननु तदर्थविषयकशाब्दत्वावच्छिन्नं प्रति तच्छक्तपदज्ञानत्वेन हेतुत्वकल्पनान्नोक्तानुप
पत्तिरिति चेत्तर्हि दिशांतरस्थस्य पुंसः काश्यां गौरस्तीति वाक्याच्छाब्दप्रत्ययो न स्यात् अगृहीतस्य काशीस्था
यां शक्तिग्रहोऽस्ति अत्र मीमांसकाः गवादिपदानां गोत्वे शक्तिः विशेष्यं नाभिधा गच्छेत् क्षीणश
क्तिर्विशेषणे इति न्यायात् व्यक्तेस्तु जातिराश्रयं विनानुपपन्नेत्येवंरूपार्थापत्त्या लाभः एतेन गामा
नयेत्यादौ गोत्वस्यानयनेन्वयानुपपत्त्या व्यक्तेराक्षेपसंभवेऽपि गौरस्तीत्यत्र गोत्वस्य अस्तित्वेन्वयसंभ
वेनानुपपत्तिज्ञानस्यैवासंभावितत्वात् न तेन व्यक्तेर्लाभ इति दीक्षितोक्तमपास्तं गोपदस्य गोत्वे शक्तिर्व्य
क्तौ लक्षणेति मिश्राः तदुक्तं जातावस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति नित्यत्वाल्लक्ष्यमाणाया व्य पक्ष
क्तेस्ते हि विशेषणे इति अस्तित्वनास्तित्वे उत्पादविनाशौ न च युगपद्वृत्तिद्वयविरोधः गंगायां घोषम
त्स्यौ स्त इत्यत्र तत्स्वीकारेण तदनभ्युपगमे बाधकाभावात् तन्न शक्यादन्येन रूपेण ज्ञाते भवति ल
क्षणा यथा गंगायां घोष इत्यत्र तीरत्वेन ज्ञाने न ह्यत्र व्यक्तिर्गोत्वादतिरिक्तरूपेण ज्ञाता व्यक्तित्वेन सा
स्नादिमत्त्वेन ज्ञानेन च तेनैव शाब्दबोधापत्तिः लक्ष्यतावच्छेदकरूपेणैव लक्ष्यस्य भाननियमात्
कुब्जशक्तिवादिनस्तु जातौ व्यक्तौ च शक्तिः परं तु जातिविषयकत्वेनैव ज्ञाता शक्तिर्व्यक्तिविषयशा
ब्दबोधे कारणम् व्यक्तिशक्तिस्तु स्वस्वरूपसत्युपयुज्यते नन्वेवं व्यक्तिशक्तिस्वीकारवैयर्थ्यमिति वाच्य
म् तत्पुदाशक्यस्य भाने घटादेरपि भानप्रसंगेन व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात् तथा च गोत्वप्र
कारकं शक्तिज्ञानं हेतुरित्याहुः तन्न गौरवात् नैयायिकास्तु जातौ व्यक्तौ वैशिष्ट्ये च शक्तिरिति
संप्रदायमतेन तदुक्तं जात्याकृतिव्यक्तयः पदार्थ इति एकशक्तिसूचनाय पदार्थ इत्येकवचनं

२ गोविषयकशाब्दबोधं प्रति गोत्वविषयकगोपदशक्तिमती गौरित्याकारकं २

श
वृत्तिदी· संप्रदायमतेजातौशक्तिस्वीकारेगौरवं कथंतर्हिजातिबोधइतिचेत् यथैकस्यप्रवाहसंबंधस्यतीरत्वतीरयोरभावा
छक्वयसंबंधरूपायालक्षणायाः एकस्याःलक्ष्मतावच्छेदकलक्ष्ययोरसंभावितयालक्ष्यतावच्छेदकविशिष्टेलक्षणा
२ याअनंगीकारेणगंगायांघोषइत्यादौस्वघटत्यानुपस्थापितस्यापि॥ तस्यापितीरत्वस्यशाब्दबोधेभानंतथा
शक्यतावच्छेदकेशक्त्यभावेतादृशकार्यकारणभावलाघवाद्गोत्वभानंभविष्यति नव्यमतेतुगव्येवशक्तिर्नतु
गोत्वेपिगौरवात् नचैवंगोत्वप्रत्यायनापत्तिः गोत्वविशिष्टशाब्दबोधंप्रतिगोत्वधर्मितावच्छेदकशक्तिग्रहस्यहे
तुत्वा ॥ प्राभाकरास्तु कार्यान्वितेपदानांशक्तिरित्याहुः यत्तुदीक्षिताःपदंतावच्चतुर्विधं रूढंयोगिकंयोगिक
रूढंयोग्गरूढंच यत्रावयवशक्तिनिरपेक्षेणसमुदायशक्तिमात्रेणबोधः तद्रूढं यथागोपदं यत्रावयवार्थएव
बुध्यतेतद्यौगिकं यथापाचकादिपदं यत्रयोगिकरूढार्थयोःस्वातंत्र्येणबोधस्तद्यौगिकरूढं यथोद्भिदादिपदं
योगिकंरवनित्रेरूढं योगरूढंपंकजादिपदमित्याहुः अत्रेदंवक्तव्यं पद्यतेर्थोनेनेतिशुत्पत्त्यर्थबोधकप्रकृतिप्रत्य
यादिपदशब्देनविवक्षितं उतसुप्तिङंतमिति नाद्यः तत्रावयवार्थाभावेनयत्रावयवशक्तिनिरपेक्षेतिस्वग्रंथ णे
विरोधात् नांत्यः रूढादौप्रकृतिप्रत्ययसमुदायेशक्त्यस्वीकारात्पदस्फोटापत्तेः तथाचमतसिद्धांतहानिः यद
पिरूढंगोपदमित्युक्तंतन्न तत्रापिगच्छतीतिव्युत्पत्तिसंभवेनकेवलरूढत्वाभावात् गमनकर्तृत्वविशिष्टेगोत्वे
शक्तिरितिवक्तुंशक्यत्वात् भवद्भिरपिधेनुपदेयोगरूढित्वस्वीकारात् धेनुपदेअवयवार्थःप्रतीयतेइहतुने
ति अत्रविनिगमकाभावात् तस्मान्मणिनूपुरादिरुदाहर्तव्यं एवंपाचकादिकंकेवलयोगिकोदाहरणमपिन
भवद्रीत्यापचइति अकइतिशक्तंपदं नचतत्रावयवार्थबोधःसंभवति नचभवद्रीत्यासुबंतपदमेवमयाग्राह्यं
तस्यापिसुविशिष्टेशक्त्यभावेनदोषतादवस्थ्यात् शक्तंपदंचतुर्धेतिचिंतामण्यादावुक्तत्वात् नन्वश्वगंधपदे
ओषधिविशेषरूपार्थबोधनिरूपितारूढिः अश्वसंबंधवत्त्वयावाजिशालाबोधेतुयोगमात्रं एवंमंडपपदेपिमं २

डपानकर्तृबोधेयोगमात्रंगृहविशेषबोधेरूढित्वादिसिद्धांतःकथंसंगच्छते रूढिजन्योपस्थितिर्योगार्थान्वयप्रतिबंधिके
त्येतदर्थकरूढियोगमपहरतीतिन्यायविरोधादितिचेत् यत्रोभयत्रापिप्रकरणंतदभावोवातत्रैवन्यायस्यप्रवृत्तेःय
त्तुयत्रोभयोरन्वययोग्यतामंडपंपश्येत्यादौतत्रापिरूढियोगापहारितेत्यत्रतुवैयाकरणनव्यास्तन्न तत्रयोगार्थएवप्र
करणासत्वेनयोगार्थस्यैवमानत्वात् ननुपंकजपदात्तिर्यतमस्योपस्थित्यासमुदायरूढिस्वीकारेपिउद्भित्पदेनख
नित्रमिवपंकजपदात्कुमुदमपिबुध्येतयोगसत्वादितिचेन्न संप्रदायमतेमत्रयोगरूढिभ्यामेकार्थबोधस्तत्रकेवल
योगिकार्थबोधेरूढेःप्रतिबंधकत्वात् मणिकृतस्तुरूढ्यानियमतःस्मृतंपद्ममेवकर्तृवाचकप्रत्ययेनपंकजकर्तृतया
नुभाव्यतेबाधकंविनाव्यक्तिवचनानांसन्निहितविशेषपरत्वनियमात् व्यक्तिवचनानांयत्किंचिद्व्यक्तितात्पर्यका
णांसन्निहितउपस्थितप्रथममित्यर्थः तथाचपद्मतात्पर्यसत्वेनपंकजनिष्ठकर्तृतयातदेवयोगेनापिप्रतीयते
नकुमुदमितिरूढेनप्रतिबंधकत्वं शाब्दाभावानवगाहित्वाज्ज्ञानकत्वानाविरोधित्वाच्चेत्याहुस्तन्न कुमुदंपंकजमि
८ त्यत्रपद्मेतात्पर्याभावनिश्चयस्यैवतत्रबाधकत्वेनप्रथमोपस्थित्याचबाधकंविनोपस्थितिप्रवृत्त्यालक्षणांविनैवकुमु श्री
दबोधापत्तेः नचेष्टापत्तिः गृहीतपद्मप्रयोगस्यपद्मान्वयानुपपत्तिःपुरःसरैवकुमुदधीरितिसिद्धांतो
व्याहन्येत नचपंकजमित्यत्रउप्रत्ययस्यपद्मत्वविशिष्टेलक्षणैवास्तामु युगपद्वृत्तिद्वयस्यगंगायांमीनघो
षावित्यत्रेवसंभवात् किंसमुदायशक्तितेतिवाच्यम् उप्रत्ययस्याप्रकृतितयातदर्थपद्मत्वविशिष्टेपंकजोत्त
रविभक्त्यर्थस्यान्वयापत्तेः प्रत्ययानांहिप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात् एकाक्षरकोशावधृतश
क्तिकखादिवर्णानामपिलक्षणयैवोपपत्तौचकखादिशब्दानामपिसमुदायशक्त्यभावापत्तेश्च अन्येतुपं
कजपदेयोगएवपद्मत्वविशिष्टस्मृतिसंस्कारानुद्बोधकंचपंकजपदमेव प्रत्ययानांप्रकृतिप्रयोज्योपस्थि
तिविषयान्वयित्वम् तेनविभक्त्यर्थकर्मत्वादेःपद्मत्वविशिष्टेन्वयः धूमोस्तीत्यादौसतितात्पर्येधूमोपस्था

वृत्तिदी· ध्यवच्छेदोऽभवत्येवैकत्वान्वयः संस्कारान्नियतोपस्थितिकपद्मत्वविशिष्टमेवादाय योगार्थबोधस्य व्युत्पन्नत्वान्न
कुमुदसाधारणो बोध इत्याहुः एवं पंकजपदात्पद्मबोधो लक्षणयैव तद्विजातीयमेवेति पद्माकृतिसदृशाकृतौ
४ स्थलपद्मत्वविशिष्टे वा लक्षणा ननु शक्यादन्येन रूपेण ज्ञाते भवति लक्षणेति न्यायात्समुदायस्य पद्मत्वेन लक्ष
णानुपपत्तिरिति चेत् कर्तृवाचकउप्रत्यये सा बोध्या नानार्थस्थले तु इयं शक्तिः संयोगादिभिर्नियम्यते यथा स
हरि शंखचक्रो हरिरित्यादौ शंखचक्रसंयोगाद्धरिशब्दस्य विष्णौ तत्र नियमनं नाम उपस्थितयोर्द्वयोरेकतर
मात्रार्थविषयकतात्पर्यनिर्णयद्वारा तन्मात्रविषयकशाब्दबोधजननम् नानार्थशब्दजन्यशाब्दबो
धे तात्पर्यनिर्णयस्य हेतुत्वात् इति शक्तिनिरूपणम् समाप्तिमगमत् ७ श्रीः
लक्षणा तु शक्यादशक्योपस्थितिरित्येके गंगापदेन शक्त्या प्रवाहोपस्थितौ तत्र चान्वयानुपपत्ति
संधानानंतरं गंगापदात्पुनः स्मृतेन प्रवाहोपयिकसंबंधिज्ञानस्यापरसंबंधिस्मारकतया स्व
संबंधि तीरमुपस्थाप्यते तथा च सैवोपस्थितिर्लक्षणेति भावः तन्न वृत्तेरुपस्थितिहे
तुत्वेनोपस्थितिरूपत्वाभावात् अशक्ये तात्पर्यं लक्षणेत्यन्ये गंगापदाशक्यती
रतात्पर्यं गंगापदात्तीरबोधो जायतामितीच्छाविषयत्वं तन्न घटमानयेत्या
दौ घटकर्मत्वयोराधेयत्वरूपसंसर्गे तात्पर्यसत्त्वात्तत्र लक्षणात्वं स्यात् न चेष्टा
पत्तिः अन्वये न शक्तिर्न वा लक्षणेति सिद्धांतव्याघातात् तस्मात्स्वशक्यसंबंधो लक्षणा ४

स्वं लाक्षणिकं पदं तस्य यच्छक्यं तत्संबंधो लक्षणेत्यर्थः सा द्विधा गौणी शुद्धा च तद्भिन्नत्वे सति तद्गतभू
यो धर्मवत्त्वं सादृश्यं तदात्मकः शक्यसंबंधो गौणी ते च प्रत्येकं जहत्स्वार्थाऽजहत्स्वार्थेति भेदाद् द्वि
विधे तत्र जहत्स्वार्थत्वं शक्यार्थस्य केनापि रूपेण लक्ष्यार्थान्वयितानन्वयित्वं शक्यार्थस्य त
दन्वयित्वं अजहत्स्वार्थत्वं यथा गौर्वाहीकः अत्र वाहीके गवाभेदस्य बाधात् गोपदेन गोसादृश्यं लक्ष्यते
गोसादृश्यं च गोगतजाड्यमांद्यादिकमेव तथा च जाड्यमान्द्याश्रयो वाहीक इति शाब्दबोधः गौणी अज
हत्स्वार्था तु नास्त्येव सादृश्यसंबंधेन लक्षणाया मुख्यार्थस्य लक्ष्यार्थान्वयिनानन्वयात् गोवाही
कौ भ्रयपरे गाव एते समानीयंतामित्यादौ गोवाहीकसमुदायः छत्रिन्यायेन लक्ष्यते न तु गोसदृश
त्वं स्वस्मिन् भेदघटितस्वसादृश्याभावादिति प्राञ्चः नव्यास्तु यत्किंचित्गोसदृशत्वेन गोवाही
कसमुदायप्रतिपिपादयिषया गाव एते यांतीति प्रयुक्ते तदा गौण्यप्यजहत्स्वार्थात्वं दुर्वारमित्याहुः शुद्धा
जहत्स्वार्था गंगायां घोष इत्यादौ शुद्धाजहत्स्वार्था यथा काकेभ्यो दधि रक्ष्यतां छत्रिणो यांतीत्यादौ दध्युपघातके
न काककुक्कुरादीनामेकसार्थ नाहि तेन तत्र च छत्रिणोऽबोधात् नैयायिकास्तु छत्रं तस्य वाक्यहेतोः शक्यत्वाच्छ
त्रपद एव एकसार्थलक्षणा मतुबर्थश्च संबंधः तथा च एकसार्थवंतो यांतीति वाक्यार्थबोधः अथवा प्रकृ
तावेव एकसार्थवति लक्षणा प्रत्ययश्च तात्पर्यग्राहकः यद्वा प्रत्यय एव एकसार्थवति लक्षणा छत्र
पदं तात्पर्यग्राहकमित्याहुः एवं लक्षितलक्षणाप्येको भेदः द्विरेफः कंदक इत्युदाहरणं तत्र द्विरेफो यत्र

६८ तिवउक्तौहित्वाद्रेफद्वयसंबंधिन्यर्थेशक्तम् यद्यपियोगमात्रंक्रूरादिपदेप्यस्तितथापिरूढ्याभ्रमरपदमेवबोध
यति तेनचस्वशक्यसंबंधिभ्रमररूपोर्थइलक्ष्यतइतिद्विरेफपदस्यभ्रमरेलक्षणा नचद्विरेफपदलक्ष्यभ्र
मरपदस्यशक्त्यैवनिर्वाहितंभ्रमरलक्षणयेतिवाच्यं प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमे
५ नभ्रमरस्यद्विरेफपदार्थत्वाभावेनतत्रविभक्त्यर्थानन्वयापत्तेः नचशक्यादन्येनरूपेण ज्ञातेभवतिल
क्षणेतिभ्रमरपदशक्यतावच्छेदकभ्रमरत्वस्यकथंलक्ष्यतावच्छेदकत्वंशक्त्यैवतद्बोधसंभवादितिवाच्य
म् शक्येनरूपेणलक्षणानंगीकारेशक्त्याचतद्बोधसंभवेलक्षणाकल्पनमफलमित्युक्तस्यैवबीजतयाप्र
कृतेचशक्त्याभ्रमरत्वविशिष्टस्यबोधस्वीकारेभ्रमरस्यद्विरेफपदार्थत्वाभावेनविभक्त्यर्थान्वयानुपप
त्याशक्यस्यापिलक्षणयैवभानमुपेयते तथाचलक्षितपदस्यलक्षणालक्षितलक्षणासाचद्विरेफपदस्य
वृत्तिरितिइममतिरिक्तेतिप्राञ्चः तन्नशक्यसंबंधोहिलक्षणा नतुशक्यस्यसाक्षात्संबंधःगौरवात् त
थाचद्विरेफपदस्यलक्षणयैवोपपत्तेर्नातिरिक्तवृत्तिरितिदिक् वस्तुतस्तुद्विरेफपदस्यभ्रमरेशक्तिरे
वसामविशेषेरथांतरादिपदानामिवतत्रावयवार्थाभावात् अतएवभ्रमरपर्यायेषुद्विरेफकोशेषुपाठः
नहिलाक्षणिकानांपर्यायेषुक्वचित्पाठःकोशेषुदृश्यते बाधप्रतिसंधानंविनैवद्विरेफपदात्भ्रमरोप
स्थितेश्च शक्तिरेवोचितानलक्षणा नन्वेवंलक्षितलक्षणोच्छेदापत्तिरितिचेन्न हिरण्यपूर्वंकशिपुं ५
प्रचक्षतइत्यादौलक्षितलक्षणांविनानिर्वाहात् वेदांतिनस्तुतत्वमसीत्यादौपरोक्षत्वैतन्यापरोक्षत्वैत
न्यवाचकयोस्तत्वमोःसामानाधिकरण्यान्वयानुपपत्त्याचैतन्यमात्रेलक्षणा जहदजहल्लक्षणाख्यो
विभेदइत्याहुः तन्न जहत्स्वार्थापदैनैवसंग्रहात् नचजहत्स्वार्थत्वसंभवेनविनिगमनाविरहइतिवा

च्यम् नञःप्रतियोगितावच्छेदकावच्छिन्नाभावबोधकत्वेनतदसंभवात् पदानांस्वपरत्वेतुलक्षणैवनशक्ति
रन्यलभ्यत्वादित्याहुस्तन्न ग्राह्यत्वंग्राहकत्वंचद्वेशक्तीतेजसोयथा तथैवसर्वशब्दानामेतेपृथगवस्थिते
इतिरीत्याशक्तिरेवन्याय्या अनन्यलभ्योहिशब्दार्थइत्यस्यार्थःशब्दोरत्तिपरः तथाहिसंसर्गादिनालभ्ये
वृत्तिकल्पनमन्याय्यमितितदर्थः तथाचअलभ्यत्वादितिहेतूपन्यासोमुधैवेतिदिक् व्यंजनायाःश
क्तिलक्षणामूलत्वान्निरूपणानंतरंप्राप्तावसरतयासानिरूप्यते तल्लक्षणंतुशक्तिलक्षणाजघन्यप्रती
तिजनकःशब्दनिष्ठोव्यापारोव्यंजनेति अत्रनैय्यायिकाः व्यंजनानवृत्त्यंतरं लक्षणैवतदर्थसिद्धेः न
नुलक्षणायांमुख्यार्थेइतरान्वयानुपपत्तिर्बीजं नन्च गच्छगच्छसीत्यादौसास्तीतिचेत् किमिदंलक्षणा
बीजं लक्षणाजन्यशाब्दबोधेसहकारित्वंतदितिचेन्न यष्टीःप्रवेशयेत्यत्रयष्टिपदस्ययष्टिधरेलक्ष
णा नचतत्रमुख्यार्थेयष्टौप्रवेशनान्वयानुपपत्तिरितिव्यभिचारात् अपितुतात्पर्यानुपपत्तिरितिचे
त्तर्हिगच्छगच्छसीत्यत्रापिकांतगमनाभावएवतात्पर्यविषयः तदन्वयानुपपत्त्यागमनबोधकपदस्यग
मनाभावेलक्षणयैवोपपत्तौनातिरिक्तवृत्त्यंतरकल्पनंगौरवात् नन्वेवंलक्षणामूलंव्यंजनायाःनि
रासेप्यभिधामूलावश्यंवाच्या तथापिनानार्थसैंधवमानयेत्यादौभोजनप्रकरणंलक्षणस्येवाश्वादे
रपिप्रतीत्यापत्त्याशक्त्यानानार्थविषयकशाब्दबोधेजननीयेप्रकरणादिसहकारिअवश्यंवाच्यम्
नानार्थस्यतेर्थांतरप्रतीतिःशक्त्यैवशक्यतावच्छेदकैकत्वेपिशक्यतावच्छेदकनानात्वंनानार्थत्वम्
नचनानार्थविषयकशाब्दत्वावच्छिन्नंप्रतिप्रकरणादीनांकारणत्वात् तदभावेकथमर्थांतरप्रतीतिःस्या
त्स्येतिवाच्यम् प्रकरणादीनामननुगमेनव्यभिचारान्नकारणताकिंतुतात्पर्यग्रहादेवतदर्थप्रतीति
रपदार्थेतितात्पर्यआहकांतराज्ञात्पर्यग्रहेसतिअपरपदार्थप्रतीतिरित्यलमभिधामूलव्यंजनास्वी

र॰दी॰ कारेण ननुलक्षणापदनिष्ठायांव्यंजनातुपदैकदेशाश्रितेत्याश्रयभेदाद्भेद इतिचेन्न तदेकदेशादयो हि अर्थविशे
षेतात्पर्यग्राहकाः नतुतत्प्रतिपादकाः नतुलक्षणाजन्यशाब्दबोधेतात्पर्यग्रहः कारणंनतुव्यंग्ये इतिचेन्न व्यंग्येता
त्पर्यस्यानपेक्षायांगंगायांघोषइत्यादौशैत्यादिकमेवप्रतीयतेनकेशवालुकादिमत्वमितिनियमोनस्यात् ननुस
५ हृदयानांवासनाविशेषपरिपाकाच्छैत्यपावनादिकमेवप्रतीयतेनकेशवालुकादिकमितिचेत्तर्हि लक्षणास्थलेपि
सैवनियामिकास्तु मास्तुतात्पर्यग्रहस्यकारणता वस्तुतस्तु गच्छगच्छसीत्यादौ अस्यास्तात्पर्यमनुमीयते यत्रतु
नानुमितिसामग्रीतत्रोत्कटकोटिसंशयरूपसंभावनाविषयीक्रियते तथाच मागा इत्यर्थे गमनाभावप्रतीतिश्च
योच्चरितत्वरूपतात्पर्यमात्रमुन्नीयते संभाव्यते वा न तु शाब्दात्तन्निर्णयः येन तत्स्वांतरं स्वीकरणीयमित्याहुः अत्रे
दंवक्तव्यं किंव्यंजनैववनास्तीतिब्रूषे उततस्याःपदवृत्तित्वंनास्तीति नाद्यः अन्नपाकलक्षणाभिलाषोव्यंजितइ
तिसर्वजनप्रसिद्धेस्तथैवानुभवाच्चचेष्टावृत्तिव्यंजनालपितुमशक्यत्वात् नांत्यः गतोस्तमर्क इत्यादिवाक्या
दुक्तप्रतिसंध्यावंदनतात्पर्येणप्रयुक्तात्प्रतिवेश्यादीनामभिसरणोपक्रमादिबोधस्यवक्तृतात्पर्याभावेनलक्षणो
पपादयितुमशक्यत्वात् किंचदेवताप्रसादादिनारचितकाव्येरचितुस्तदर्थज्ञानाभावेन तदर्थेतात्पर्याभावेनच ६
तात्पर्यग्रहासंभवेपिव्यंग्यस्यचमत्कारिबोधविधविषयतायाबहुशोदृष्टत्वाच्च यदप्युक्तं व्यंग्येतात्पर्यस्यान
पेक्षायांगंगायांघोषइत्यादौशैत्यादिकमेवप्रतीयतेनतुकेशवालुकादिमत्वमितिनियमोनस्यादितितदसंत
रप्रसात् स्वायत्तेशब्दप्रयोगेअवाचकंप्रयुंज्महे इतिन्यायेन तटे घोष इति विहाय गंगायांघोषइतिलक्षणामु
खंप्रयोगेबीजाकांक्षायांशैत्यपावनादिप्रतीतेरेवबीजत्वंनकेशवालुकादिमत्वप्रतीतेरेवबीजत्वंनकेशवालुकादि
मत्वप्रतीतेस्तस्यास्तटेघोषइतिमुख्यप्रयोगस्यापिसंभवात् केशवालुकादिकंतटनिष्ठंनगंगापदशक्यप्रवाहा
दिनिष्ठंयद्गंगापदलक्षणयाघोषेप्रतीयेत यदप्युक्तंवस्तुतस्त्वित्यादिनाव्यंग्यार्थोनुमेयःसंशयविषयोवेति त
न्न व्याघ्र्यादिज्ञानाभावेपितदर्थप्रतीतेःसंशयस्याप्रतीतेश्च किंच रतिकालेविलोक्यश्रीनाभिपद्मेपितामहं

रसाकुलाद्याप्यतेदक्षिणंनयनंहरेरित्यादौहरिपदेनदक्षिणनयनस्यसूर्यात्मकत्वंतन्निमीलनेनसूर्यास्तमयस्ते
नपद्मसंकोचस्तेनपितामहस्यगमनंतेनाप्रतिबद्धरतिविलसितमितिक्रमेणव्यंग्यार्थप्रतीतेर्व्यंजनावश्यंस्वीकार्या
नह्यत्रलक्षणासंभवति सर्वत्रैकस्यशक्यसंबंधस्याभावात् संबंधभेदेपितत्स्वीकारेलक्ष्यतावच्छेदकेनलक्षणा
संबंधभेदादितिभवत्सिद्धांतोव्याहन्येत किंचानपार्थबोधेजननीमेववक्तृबोद्धृवाच्यादिवैशिष्ट्यज्ञानंप्रतिभात्वं
सहकारिप्रतिभात्वंनवनवोन्मेषशालिनीबुद्धिः तदुक्तं प्रज्ञानवनवोन्मेषशालिनीप्रतिभानवनवोन्मेषोजन्मांतरी
यजनकत्वज्ञानजन्यसंस्कारोद्बोधः ननुलक्षणायामपिवक्त्रादिवैशिष्ट्यज्ञानादेःसहकारित्वमस्तु इतिचेन्न
तदभावेपितात्पर्यग्रहेसतितदर्थप्रतीतेः गंगायांघोषइत्यादौसर्वान्प्रतिएकरूपेणैवबोधः नैत प्रागतोस्तमर्क
इत्यादौ तस्याःअतिरिक्तत्वेप्रामाणिकव्यवहारोपिनियामकः तथापिनिपातानांद्योतकत्वमाकरेउक्तम् द्यो
तकत्वंचसमभिव्याहृतपदशक्तिव्यंजकत्वम् इदंपदमेतस्यनवाचकंनापिलक्षकंअपितुव्यंजनयाबोधकमि
त्यादिप्रामाणिकव्यवहारश्च एवंव्यंजनायाःआनन्यकत्वेपियदिदुराग्रहात्त्यज्यतेतर्हिबोधकशक्तिरित्याश्रि
त्यलक्षणापित्यज्यतांनहिलक्षणास्वीकारोव्यंजनात्यागश्चयुक्तिसहइत्यास्तांतावत् ननुबोधकत्वंचेच्छक्तिस्त
र्हिचेष्टायाःअपिबोधकत्वाच्छक्तित्वापत्तिरितिचेन्न चेष्टाशक्तिरितिप्रामाणिकव्यवहाराभावात् किंतुतत्
ज्जन्यबोधेतज्जन्यस्यकारणत्वमात्रंतद्वाचकशब्दस्मरणद्वाराचेष्टयाबोधइत्यपिकश्चित् इतिव्यंजनानिरू
पणं सकलशब्दमूलभूतत्वाद्धात्वर्थोनिरूप्यते तत्रगुरुमतानुयायिनः यत्नातिरिक्तःफलानुकूलोव्यापारो
धात्वर्थः यत्नःआख्यातार्थः धात्वर्थेकारकान्वयः मंडनमिश्रमतानुयायिनस्तु फलमेवधात्वर्थः व्यापारः
प्रत्ययार्थः प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थाश्रयत्वमेवकर्मत्वं घटंभावयतीत्यत्रणिच्प्रत्ययार्थव्यापा
रव्यधिकरणोत्पत्त्याश्रयत्वेनघटादेःकर्मत्वं अंतर्भावितण्यर्थप्रत्ययस्यैवणिजर्थेलक्षणेतिनदोषः प्रत्य
यार्थव्यापाराश्रयत्वमेवकर्तृत्वं. एवंचकालस्यस्ववाचकाख्यातव्यापारान्वितत्वमपिलाभ्यत इत्यलमनुकूल

भू·दी· मित्याहुस्तन्न गुरुशिष्याभ्यां पाचयतीत्याद्यनापत्तेः तत्र हि प्रयोजकव्यापारो णिजर्थः प्रयोज्यव्यापार आख्यातार्थः
एवं च संख्यायाः स्ववाचकाख्यातार्थव्यापारान्वयित्वेनान्वयात् शिष्याभ्यामिति द्विवचनतत्तीयानापत्तिः गुरुरित्य
त्र तत्तीयापत्तिश्च अन्ये तु धातोः केवलव्यापारे शक्तिः फलं कर्मप्रत्ययार्थः लाघवादित्याहुस्तन्न कर्मणि द्विती
याचतुर्थ्यादिविधानेनानेकसुप्तिङां च फले शक्तिकल्पनापेक्षया फलविशेषबोधेन तद्धातुसमभिव्याहारस्य
कारणत्वापेक्षया धातोरेव फले शक्तिकल्पनाया उचितत्वात् तंडुलः पच्यते स्वयमेवेत्यादिकर्मकर्तृप्रयोगानु
रोधेन फलस्यापि धातुवाच्यत्वावश्यकत्वाच्च वैयाकरणास्तु फलानुकूलो व्यापारो धात्वर्थः तत्र फले व्यापा
रे च पृथक् शक्तिः फलांशः उत्सर्गतः व्यापारे विशेषणं जन्यत्वं संसर्गः क्वचित्तु विषयत्वं संसर्गः धातुना साध्या
क्रियाभिधीयते घञादिभिश्च सिद्धावस्थापन्ना तत्र क्रियांतराकांक्षा उत्थापकतावच्छेदकत्वरूपं साध्यत्वं
ह क्रियांतराकांक्षोत्थापकतावच्छेदकरूपं सिद्धत्वं ननु कष्टं न मे स्वे सुखं यायादित्यादावनन्वयापत्तिः नमम
क्रियायाः आकांक्षाविरहादिति चेन्न चेष्ठद् समभिव्याहारप्रयुक्ताकांक्षोत्थानात् पचति भवतीत्यादौ
पचतीत्यस्याकांक्षाभावेपि भवतीत्यादेः कर्त्राद्यपेक्षायोग्यतावशादन्यतीकांक्षयैवान्वयेनादोषात् नन्वे त्या
वमस्ति भवति विद्यतीनां धातुत्वानापत्तिस्तेषां सत्तामात्रार्थत्वेन व्यापाररूपक्रियावाचकत्वाभावादिति
चेन्न तत्रापि सत्ताविषयव्यापारस्यैवार्थत्वात् नन्वेवं किं करोतीति प्रश्ने पचतीत्यस्येवास्तीत्यस्याप्युत्त
रत्वं स्यात् आसन्न विना शं किंचिदुद्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्य सर्वसंमतत्वात् गुरुस्तु उत्प
त्तिव्यधिकरणस्तदनुकूलो व्यापारोर्थः नैयायिकास्तु कृञो यत्नमात्रमर्थः नन्वेवमकर्मकतापत्तिरिति
चेन्न यद्धातूच्चारणे कर्माकांक्षा नियता स सकर्मकः नन्वेवमकर्मकतापत्तिस्तत्समानार्थकेष्वपि धातु

त्वविशेषोपस्थापननिबंधना एवं च कृञ् धा धातोर्यत्नार्थत्वाविशेषेपि कृञ एव सकर्मकत्वं न यतेः यथा कर्मत्वा
दिपदोपस्थाप्यस्य क्रियाकांक्षाभावेपि द्वितीयोपस्थाप्यस्य तत्साकांक्षत्वमित्याहुस्तन्न गच्छत्यादीनां यते
रिव कुत्रेत्याकांक्षासत्वेन कर्माकांक्षाविरहेणाकर्मकतापत्तेः किं च कृञो यत्नमात्रार्थत्वे दृशेरिव कर्मस्य भा
वकत्वाभावात् यत्नप्रतिभवद् इत्यत्रेव क्रियते घटः स्वयमेवेत्यत्रापि यत्नादिकं न स्यात् ननु किं तर्हि धातोः स
कर्मकत्वाकर्मकत्वे स्वव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं तत्समानाधिकरणफलवाचकत्वम
कर्मकत्वमिति केचित् वस्तुतस्तु एतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वं अत एव मास
आस्यत इत्यादौ कर्मणि लकारः एतेन केवलव्यापारवाचकत्वमकर्मकत्वं फलव्यापारोभयवाचकत्वं
सकर्मकत्वमिति नैयायिकोक्तमपास्तं किं च केवलव्यापारवाचकस्यैवाकर्मकत्वे ऊर्ध्वदेशसंयोग
रूपव्यापारस्योत्पूर्वकस्या धातोरर्थस्य विद्यमानत्वे उत्थित इति भूतक्तांतप्रयोगानुपपत्तिः वैयाक
रणमते तु ऊर्ध्वदेशसंयोगानुकूलव्यापारस्यातीतत्वात् ऊर्ध्वदेशसंयोगसत्वेपि तथा प्रयोगोपप
त्तिः केचित्तु कर्मकर्तृत्वं व्यापारव्यधिकरणफलवाचकत्वाभावएव सत्वात्स्यादौ फलांशाभावादुत्ति
ष्ठतीत्यादौ सामानाधिकरण्यादित्याहुः तत्र गौरवात् मतेरपि गम्यादिवत्सकर्मकत्वं नन्वेवं वृक्षा
त्पर्णं पततीत्यत्रापि स्यादित्याहुः इष्टापत्तेः अतो द्वितीया श्रितेति सूत्रे नरकपतित इत्युदा एव
हृतं हृतमिम् अनुभूयते सुखं साक्षात्क्रियते गुरुरित्यादौ निपातानां द्योतकत्वेनानुभव साक्षात्काररूप
फलयोर्धात्वर्थत्वात् कर्मणि लकारः यत्तु उपसर्गाणां द्योतकत्वे व्यतिसे इत्यादौ कथं व्यत्ययप्रत्यय इति
चेत् लुप्तधातुस्मरणात् धातुलोपमजानतस्तु बोधो न भवत्येवेत्याहुर्नैयायिकाः तन्न राजपुरुष

त्वा

वृ·दी· इत्यादौ प्रत्ययलोपमजानतोपि लक्षणयातदर्थबोधवदत्रापि धातुलोपमजानतोपि प्रत्ययमात्रस्यल
क्षणयैवबोधोपपत्तेः नहिप्रत्ययलोपेप्रकृतेस्तदर्थलक्षणाप्रकृतिलोपेप्रत्ययमस्यनेतियुक्तिमत् न
नुनिपातानांद्योतकत्वेमातेवहितकारिणीमित्यत्रप्रथमानुपपत्तिः मातृशब्दस्यतत्सदृत्तोलाक्षणि
८ कतयाद्वितीयांतेनसामानाधिकरण्यात् द्वितीयापत्तेरितिचेत्सत्यम् असाधुरेवायंयदिसमर्थनी
यइत्याग्रहस्तर्हिपदसंस्कारपक्षेशब्दंक्षुदित्यत्रनपुंसकत्वमिवात्रापिप्रथमोपपत्तेः यत्तुवाचक
त्वेइवशब्दार्थेन्वयेनद्वितीयांतसामानाधिकरण्याभावान्नद्वितीयेत्यूचुर्वैयाकरणनव्यास्तन्न चंद्र
इवमुखंपश्येत्यादेरप्यापत्तेः अथास्तुवाचकता नचानुभूयतइत्यादिप्रयोगानुपपत्तिः स्वस्व
युक्तनिपातनान्यतरार्थेफलव्यधिकरणव्यापारवाचकत्वंसकर्मकत्वमितिस्वीकारात् नचकीट
शः समुच्चयइतियत्कीदृशाश्चइत्यपिस्यात् तथाघटानांसमुच्चयइतिवत् घटानांचइत्यपिस्या
दितिवाच्यं यथैवधातूपस्थाप्यभावानांप्रतिकारकादियोगेपिभावनापदोपस्थाप्यभावानांप्रति ८
नान्वयः शब्दशक्तिस्वाभाव्यात् तथैवशब्दोपस्थाप्यस्यसमुच्चयेपिविशेषणीययोगइतिसिद्धांतात्
ननुप्रतिष्ठतेइत्यत्रगमनत्वेनरूपेणबोधोनस्यात् स्थाधातोर्गतिनिवृत्त्यर्थेअभावस्यप्रशब्दा
र्थत्वेपिगत्यभावोनास्तीत्येवप्रत्ययापत्तेर्नचतथाबोधानुभवइतिचेन्न धातूनामनेकार्थत्वा
त्तिष्ठतेरेवगतिरर्थः प्रशब्दस्तुआदिकर्मबोधकइति भूवादयइतिसूत्रेभाष्येएवस्पष्टत्वात् न
चशारेस्त्रैरिवोदीच्यानुद्धरिष्यन्रसानिवेत्यादौ अस्त्रसदृशैः रससदृशानित्यर्थादुत्तरसपदो
उ

त्तरतृतीयाद्वितीयाभ्यांनइवार्थगतकर्मत्वकरणत्वेबोधयितुंशक्ये अप्रकृत्यर्थादितिवाच्यं इवपदोत्तरत्
तृतीयायाद्वितीययाचतद्बोधात् नचसत्वबाचकत्वेनाव्ययत्वंलिंगान्न्वयित्वरूपासत्वस्यापत्तेः एवंच
प्रतियोगिविशिष्टःसदृशइवार्थः तत्रप्रतियोगिनिउत्तरस्याभेदान्वयः सदृशास्यचशरेषुअभेदेनउत्तरप
दोत्तरतृतीयारसपदोत्तरद्वितीयाच उपमानोपमेययोःसमानविभक्तिकत्वनियमात् तद्बीजंतुउपमा
नोपमेययोःक्रियायामन्वयःपाक्षिकःपरस्परमितिबोध्यम् एवंवाचकत्वेयुक्तिसंभवेसत्यपिद्योतक
तापक्षएवज्यायान् सर्वथानैयायिकोक्तमुपसर्गाणांद्योतकत्वंनिपातानांवाचकत्वमित्यर्द्धजरतीयंहेय
मेव अथतिङामर्थोनिरूप्यते तत्रकर्तृकर्मविहिततिङामाश्रयोर्थः आश्रयत्वंचारवंडोपाधिरूपंश
क्यतावच्छेदकंम् वर्तमानत्वादिकालस्तुधात्वर्थव्यापारंप्रतिप्रकारत्वेनान्वेतिसंख्यात्वाश्रये अत्रनैया
यिकाः आख्यातस्ययत्नएवशक्यःलाघवात् यत्नार्थककरोतिनाविवरणाच्च अपूर्वोच्चरितवाक्यस्यो
त्तरवाक्येनहार्थकथनंविवरणं तथाचाख्यातपदंयत्नत्वावच्छिन्नेशक्तं यत्नत्वावच्छिन्नशक्तकरोति
धातुप्रतिपादितार्थकत्वात् रथोगच्छतीत्यादावाश्रयेलक्षणा नचविभक्तौलक्षणानास्तीतिसिद्धांतव्या
कोपः तस्यानुशासितविभक्त्यर्थातिरिक्तविभक्त्यर्थेनलक्षणेत्यभिप्रायकत्वात् विभक्त्यर्थाविशेष
णीभूतनामार्थआख्यातार्थाविशेष्यः तत्रैवसंख्यान्वयः वर्तमानत्वादेः कृतावन्वयइत्याहुस्तन्न प्रत्य
यादिशक्तिग्राहकंव्याकरणमुल्लंघ्यस्वेच्छामात्रेणयत्किंचिदर्थकल्पनस्यानुचितत्वात् नन्वसतिबाध
८॥ केव्याकरौदिशक्तिग्राहकंलाघवात् प्रकृतेत्यज्यतेयथागुणादौइतिचेन्न लाघवत्वस्यैवासिद्धेः तथा
हिकर्तृपदस्यक्वाचित्कृतोशक्तिः क्वचित्कर्तरीत्यनेकशक्तिकल्पनेगौरवं तथात्वान्यायश्चानेकार्थत्व

र·दी· मितिन्यायविरोधः नचकृतौशक्तिः कर्तरिलक्षणेतिवाच्यं अनंतकृतिलक्ष्यतावच्छेदकत्वेगौरवस्यन्नाक्य
तावच्छेदकत्वस्पष्टत्वात् किंचनहिकृतिमान्कर्तासूत्रकारादीनां संमतः किंतुप्रधानीभूतव्यापाराश्रयत्वे
नविवक्षितः अन्यथाकाष्ठानिपचंतीतिनस्यात् तथाचलाघवात्कृतौशक्तिरित्युक्तेर्गर्भस्रावेणैवगतत्वा
त् यदपियत्नार्थंकरोतिविवरणादित्युक्तंतदपिनकरोतेर्यत्नार्थत्वेदत्तोरिवकर्मस्थभावकत्वाभावेनकर्मवद्भा
वोनस्यादित्युक्तत्वात् किंचपचतिपाचकइतिविवरणादपिआख्यातस्यकर्तरिशक्तिरवश्यंस्वीकार्या त
थाचरथोगच्छतीत्यादौनलक्षणाश्रयणक्लेशोपीतिदिक् यदपिविभक्त्यर्थोविशेषणीभूतनामार्थआख्या
तार्थविशेष्यइत्युक्तं तदपिन देवदत्तः पचतित्वंपचसिभवतित्वांपचसिभवतीत्यादीनामसाधुतापत्तेः पा
चकोऽस्तेइतिवद्देवदत्तःपचतिब्रूतेइत्यस्यसाधुतापत्तेश्च नचेष्टापत्तिः सूत्रभाष्यादिविरोधेनकेवलतर्के
णेष्टापत्तेरनुचितत्वात् वर्तमानत्वादेःकृतावन्वयइत्यपिन जानातीत्यादौकृत्यभावेनाश्रयेलक्षणापत्त्याधा
त्वर्थएवान्वयस्यावश्यंवाच्यत्वात् मीमांसकास्तु आख्यातस्यभावनावाच्याकर्तृत्वादौलक्षणेत्याहुः तन्न
युगपद्वृत्तिद्वयविरोधात् भावाख्यातेतुसाधुत्वार्थमेकवचनमेव उष्ट्रासिकाःआस्यंते हतशायिकाः
शय्यंतेइत्यादौभाष्यकारवचनाद्बहुवचनं तत्रवर्तमानत्वंलडर्थः वर्तमानत्वंप्रारब्धापरिसमाप्तक्रियो
पलक्षितत्वं भूतभविष्यद्भिन्नकालत्वंवा भूतानद्यतनपरोक्षत्वंलिडर्थः यत्नुभूतत्वंलडुच्चारणकालि
कध्वंसप्रतिक्षणवत्वं अनद्यतनत्वंलडुच्चारण— भिन्नरात्रित्वं परोक्षत्वंचप्रयोक्तृवृत्तिसाक्षात्करोमी
त्येतादृशाविषयताशालिज्ञानाविषयत्वमित्याहुः स्वंउदेवाद्रयः तत्रयजतिस्मयुधिष्ठिरइत्यादौ
भूतानद्यतनपरोक्षादौलडुच्चारणसत्वेनलक्षणद्वयस्याप्यव्याप्तेः तस्माद्भूतत्वविद्यमानध्वंसप्र
तियोगिसमयवत्वम् अनद्यतनत्वंअद्यतनभिन्नत्वं अद्यतनत्वंचातीतायाः पश्चार्द्धेनागामिः

न्याः पूर्वार्द्धेनसहितदिनत्वं॥ लुडर्थस्तुभविष्यत्वमनद्यतनत्वं॥ भविष्यत्वंविद्यमानप्रागभावप्र ६
तियोगित्वं। ननुपचतिचैत्रेभाविव्यापारप्रागभावमादायपक्ष्यतीत्यापत्तिः भूतिध्वंसमादायापा
क्षीदितिचेन्न। आद्यकृतिप्रागभावस्यैवभविष्यत्प्रत्ययेनचरमकृतिध्वंसस्यैवातीतप्रत्ययेनाभि
धानात्। भविष्यत्सामान्यंलडर्थः अनद्यतनभविष्यतिभविष्यत्वमात्रविवक्षायांलडाद्ये
वा। श्वःपक्ष्यामइतियथा। एवमनद्यतनभूतेपियदाभूतत्वमात्रविवक्षातदालुडादेव। ह्यो
ऽपाक्षीदित्यादि। स्वरंचेदंलुडाभविष्यतिगम्यादयइतिसूत्रभाष्ये। अत्रभूतत्वमात्र
विवक्षयालुङि पश्चात्तुह्यःपदाद्दिनानद्यतनप्रतीतावपिनदोषः। लेट्लोट्लिङांकालसा
मान्यविध्यादिवार्थः विधिर्निकृष्टस्यप्रवर्तनं। निमंत्रणंमावश्यकेश्राद्धेभोजना
दौदौहित्रादेःप्रवर्तनं। आमंत्रणंकामचारानुज्ञा। तत्रप्रेरकस्याग्रहाभावमात्रं। अ
धीष्टःसत्कारपूर्वकोव्यापारः। एतासर्वानुस्यूतंप्रवर्तनासामान्यंविध्यर्थः प्रवर्त
नाचप्रवृत्त्यनुकूलोव्यापारोवक्तृनिष्ठोलिङादिघटितशब्दप्रयोगादिरूपः। प्रवर्तक
त्वंचस्वातंत्र्येसतिलिङाद्युच्चारयितृत्वमेव। वेदेशब्दनिष्ठएवसव्यापारःप्रवर्तनारूपः
बोधकालिङ्घटितत्वमेव। प्रवर्तनाचवर्तमानकालेवभासते। धात्वर्थस्तुभविष्य

प्रवर्तकत्वंचप्रवर्त्तना।

 कालएवशब्दंशक्तिस्वाभाव्यात्। एवंचैकाश्रयभविष्यत्पाकानुकूलक्रियाविषयाव
र्तमानाप्रवर्तनेतिपचेदित्यादौबोधः। एतेनप्रेरणाप्रयोज्यपाकवर्तमानदशायांपचेदि
१० तिप्रयोगापत्तिरितिनिरस्तं विधिलिङ्युनमस्तुना। स्वप्रवृत्तौस्वप्रेरणायाअकारणत्वेनत
ज्ज्ञानानुपयोगात्। इदमेवाभिप्रेत्योक्तंनमपुरुषोविधिशक्तिप्रतिबंधकइतिमीमांसकाः
।अत्रनैयायिकाः। लिङादेर्बलवदनिष्टाननुबंधित्वकृतिसाध्यत्वेष्टसाधनत्वेप्रत्येकं
शक्तिः। ननुसमुदिते। कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वे
बलवदनिष्टाननुबंधित्वविशिष्टकृतिसाध्यत्वविशिष्टेष्टसाधनत्वेइष्टसाधनत्वविशि
ष्टबलवदनिष्टाननुबंधित्वविशिष्टकृतिसाध्यत्वेवेतिविनिगमनाविरहात्।। पुष्प
वछदवच्चोपपत्तिवैचित्र्यात्परस्परसमस्यापिबोधः विषसंपृक्तान्नभोजनचंद्रस्पर्शमं
डलीकरणादिनिचक्रमेणान्वयानुपपत्तिः। ननुश्येनेनाभिचरन्यजेतेत्यादौश्येनस्यहिंसात्वे
नरककृपबलवदनिष्टानुबंधित्वात्कथंविधित्वमितिचेन्न। श्येनस्यन १०
रकसाधनहिंसासाधनत्वेपिहिंसात्वभावात्। ननुकिंहिंसात्वंमरणानुकूलव्यापा
रकत्वंतादितिचेत्। कूपादौविनष्टेखनितुर्गोवधप्रसंगात्। नापिमरणोद्देशेना

नुष्टीयमानत्वेसतीतिविशेषितंतत्। गंगामरणमुद्दिश्यकृतत्रिसंध्यस्नत्वपापादेरपितत्वा
त्। किंतुमरणोद्देशेनानुष्टीयमानत्वेसत्यदृष्टद्वारामरणानुकूलव्यापारवत्वंहिंसात्वं। श्येनादे
श्चादृष्टद्वारामरणानुकूलत्वेनहिंसात्वं। ननुनित्यसंध्यामुपासीतेत्यादौफलाभावेनेष्टसा
धनताज्ञानाभावात्कथंविधित्वमितिचेन्न। तत्रापिफलश्रुतेः संध्यामुपासतेयेतुसंततंसं त
सितव्रताः विधूतपापास्तेयांतिब्रह्मलोकंसनातनमिति। यत्रतुफलंनश्रूयते तत्रारि
भ्यजितायदोषेनैस्त्रैवस्वर्गः प्रत्यवायपरिहारोवाफलंकल्प्यते। ननुप्रत्यवायपरि
हारस्तत्प्रागभावस्तस्यचेथंफलत्वंप्रागभावस्याजन्यत्वादितिवाच्यम्। यत्सत्वेय
त्सत्वंयदभावेयदभावइत्येवरूपयोगक्षेमसाधारणाजन्यत्वस्यतत्रापिसत्वात्। न
चैवंफलकामनाधीनकर्तव्यत्वानित्यत्वंब्रूमः। किन्तुयदकरणेप्रत्यवायस्तत्वं। कर्मत्रिविधंनित्यंका
म्यंनित्यकाम्यंचेति। नित्यंसंध्यावन्दनादि। काम्यंयागादि। नित्यकाम्यमेकादशीव्रतादिव
स्तुतस्तुकेवलोनित्यंनात्यंनास्त्येवेत्याहुस्तन्न। अनेकशक्तिस्वीकारेगौरवापत्तेः। मीमांस
कास्तु।। लिङादिवाच्याभावनाख्यातवाच्यापि। तत्रलिङादिवाच्याशब्दनिष्ठत्वाच्छाब्दीआख्या
तवाच्यातुअर्थीयागादितद्विषयिणीत्यार्थी। तदुक्तम्। अभिधांभावनामाहुरन्यामेवलिङादयः
अर्थात्मभावनात्वन्यासर्वस्थानस्यगोचरइति। आर्थीभावनायांकिंकेनकथमित्यंशत्रय
८ काम्यस्याप्यतुनित्यत्वमितिवाच्यं नहिफलकामनानधीनकर्तव्यत्वं ८

वृतिन्का रे गौरवंच्छ। त्रिकोटिकुलोद्धरिच्छया कृतगंगास्नानादौ नानादृष्टस्वीकारे गौरवस्य
भोक्तरि अदृष्टस्वीकारेपि तु स्यादिति चेन्न। स्वर्गसमानाधिकारपा दृष्टस्वीकारे ला
घवात्। न च पुत्रेण गयाश्राद्धं कृत्वा संकीर्तनादकृतं तत्र पितुः स्वर्गो नोपेपिन्नीरातिवा
१२ च्यम्। इष्टापत्तेः। पुत्रस्य बलपुष्ट्यादिकामनया यत्र पित्रा कर्म कृतं पुत्रेण कर्मनाश्या
स्पर्शादि कृतं तत्र फलोपपत्तौ इष्टापत्तेरेवांगीकरणीयत्वादितिदिक्। विस्तरस्त्वस्मत्कृ
ताख्यातवादे द्रष्टव्यः। लङर्थस्तु न घतनभूतत्वं। लङर्थस्तु हेतुहेतुमद्भावविशिष्टक्रि
यातिपत्तिः अयं श्रुते भ्राविनिचायष्टोयथा भोक्तः पुत्रान्नादिभिं संक्रम्यमाणापादृष्ट्वा थी
परो द्विजो ब्राह्मणार्थियादिसतेदृष्टोभाविष्यन्नतो भोक्ष्यते न तु भुक्त नित्यादौ भूते
विप्रयोगदर्शनात्। अथ सनाद्यर्थानिरूप्यंते। अथ सनाद्यर्थानिरूप्यते। सनर्थः। इ
च्छा। तत्र धात्वर्थस्य कर्मत्वं समानकर्तृत्वमात्र उभयसंबंधेनान्वयः। कुचित्संभावनापि।
तत्रैव वर्तमानत्वान्वयः। एवं च पठितुमिच्छति पिपठिषतीत्यत्र एकनिष्ठा पाठगोचरव १२
र्तमानेच्छेत्यर्थः। नैयायिकास्तु कर्तृप्रत्ययस्थानेसन्प्रत्ययार्थेच्छायाः धात्वर्थविशेष्य
तया भानं कर्मप्रत्ययस्थले च तस्या धात्वर्थविशेषणतया भानम्। अत एव चिकीर्ष्यते पा
क इत्यादौ पाकरूपेष्टति कर्मताख्यातः संगच्छते। तत्रापि वर्तमानत्वादेरिच्छायामन्वं

यः। अन्यस्यैकदेशेपि नीलं घटो घट इत्यादिस्थलेनीलरूपादौ तरवापत्त्यतिशयादित्याहुः। तन्न।
प्रत्ययार्थप्रधानमिति नियमभंगापत्तेः। सुबंतेति द्वय कल्पने गौरवाच्च। तस्माद्धात्वर्थविशेष्य
ते तेच्छा सन्प्रत्ययार्थः। चिकीर्ष्यते पाक इत्यादौ तु अनुकूलक्रियाविषयणीच्छा सन्नंत
धात्वर्थः। अन्यमते तु कृतिविषयिणीच्छा। उभयथापि जिज्ञास्यते घट इत्यादौ तत्र म
ते इच्छाविषये ज्ञानविषये घटस्य धात्वर्थकर्मत्वेन तत्राख्यातवन्मममतेपि पाकस्य धा
त्वर्थकर्मत्वं नोक्तः इच्छार्थविहितक्यच्काम्यच्अंतस्य धातोरिच्छार्थकतया सन्प्रत्य
यावित्रोत्रिपिसन्नंतधातुवत्स कर्मकत्वम्। तदंतर्गतप्रातिपदिकस्यैव कर्मबोध
कत्वात् इच्छायाः कर्मकांक्षाविरहादित्याहुर्गदाधरप्रभृतयस्तन्न॥ क्यजंतानां कर्म
कत्वासाधकहेतोः सन्नंतेपि सत्वेनाकर्मतापत्तेः। एतावान् परं विशेषः। तत्र प्राति
पदिकस्य कर्मबोधकत्वं सन्नंते तु धातोरिति किं च शिशिक्षिषतीत्यादि सन्नंतोपि अकर्मक
त्वदर्शनेन ओदनस्य पाकीयतीत्यादि क्यजंतेपि सकर्मकत्वदर्शनेन न च अकर्मकत्वसाध
कहेतोरप्रामाणिकत्वात्। यङ्लोपे नः पुनः पुनराकुल्य कौटिल्यगर्हादिद्योतकत्वानि। णिजर्थः प्रेर र्थः
णा। लिङर्थप्रेरणायां न्तेके वैप्रेरकः णिजर्थप्रेरणायां ताद्धिलोपीति भेदः। कर्तृकर्म
फलतामाश्रयोर्थः। भावकृत्सु एचितव्यमित्यादौ धात्वर्थानुवादकत्वम्॥ पाक इत्या
५ देन तत्राख्यातसंभवात् अपर्तस्वीकारस्तु एकदेशेपि कारकान्वयस्य व्युत्सलत्वात् एवं क्यजादीनामपि
इच्छेवार्थः यत्नु सुध

दा.नि.टी. मर्थमितिनैय्यायिकमतेतु कंठेकालः रास्याः पुत्रवत्पलुक् समासे लक्षणाया
अभावेन सुंदरेत्यादिविशेषणान्वयोपि स्यात् किंचनीलोत्पलमितिव्यस्त
इवसमस्तेपि उद्देश्यविधेयभावेनान्वयः स्यात्। सचसर्वनयेविरुद्धः। किंच
२४ पंकजमित्यादावपिडप्रत्ययस्यैवपद्मत्वविशिष्टेलक्षणयैवोपपत्तौ विशि
ष्टशक्तिरूढिच्छेदानवेष्टापत्तिः। अपसिद्धांतात् मीमांसकास्तु विशिष्टार्थो
लक्ष्यइत्याहुः यत्तु तत्र समासाः षट् कर्मधारयद्विगुतत्पुरुषबहुव्रीहिद्वं
द्वाव्ययीभावभेदादित्यूचुर्जयरामादयस्तन्न। पूर्वकालवत्यतीतोत्पत्यनु
कूलव्यापाराश्रय इत्येतदर्थकस्यपूर्वंभूतोभूतपूर्वइतिसमासस्यासंग्र स्या
हात्। तत्राव्ययीभावाधिकारपठितसमासत्वमव्ययीभावत्वं उपकुंभमित्या
दौ कुंभपदस्य कुंभसमीपेलक्षणोपपदं तात्पर्यग्राहकं। अथवोपपदस्यै
वसोर्थः कुंभपदतात्पर्यग्राहकमिति विनिगमनाभावाद्विशिष्टेशक्तिः
एतेन कुंभपदस्य कुंभः संबंधिनि तस्य चोपाध्यर्थे लक्षणा एकदेशेनवसा २४
मीप्येकुंभादिसंबंधिनस्तादात्म्येनान्वय इति पदद्वयलक्षणापेक्षया कुं

भपदस्यैव कुंभसमीपोपपदं च तात्पर्यग्राहकमिति दीक्षितोक्तमपास्तं। यत्तु नि
यमतः पूर्वपदार्थविशेष्यकबोधजनकसमासत्वमव्ययीभावत्वं। अर्धपिप्प
लीत्यादिवारणाय नियमत इत्यूचुर्जयरामादयस्तन्न। उन्मत्तगंगमित्या
दावव्याप्तेः तत्पुरुषाधिकारपठितसमासत्वं तत्पुरुषत्वं। तत्रापिसमुदा
येशक्तिः यत्तु नैय्यायिकैर्नव्याः समासेन समुदायेशक्तिः। राजपुरुष इत्या
दौ राजपदस्य राजसंबंधिनि लक्षणयैवोपपत्तिः अनन्यलभ्योहि शब्दार्थ
इति न्यायात्। किंच तत्पुरुषात् कर्मधारयस्य लक्षणायाभावेन यल्लघुत्वं
तन्न स्यात् उभयत्र शक्तिसाम्यादित्याहुः तत्र शक्त्यपेक्षया लक्षणायाः
शक्तिज्ञानतात्पर्यग्रहादिसापेक्षत्वेन गुरुत्वात् न चान्येति न्यायविरोधः
संसर्गादिलभ्येवृत्तिकल्पनमन्याय्यमिति तदर्थत्वात्। अर्थशब्दस्य वृ
त्तिपरत्वेनैव व्याख्यातत्वात्। किंच स्वायत्ते शब्दप्रयोगे किमित्यवाचकं
उम प्रयुंजीत इति न्यायादस्ति लक्षणाया बीजाकांक्षा। यथा गंगायां
घोष इत्यादौ शैत्यपावनत्वादि बीजं न तथा राजपुरुष इत्यादौ॥ किं

पो
द.टी. चपंकजमंडूकोद्भिदश्वकर्णरथंतरेत्यादिसमासेषु शक्तिस्वीकारस्य सर्वतंत्र
सिद्धत्वात्। तत्राप्यवयवलक्षणयैव निर्वाहे घटादौ प्रकृतेः प्रत्ययस्य चालक्षण
२५ यैवोपपत्तौ विशिष्टशक्तिरूढिर्येन। किंच शक्तिलक्षणाव्यवहारः। प्रसिध्यप्र
सिद्धिमूलकः। यथा गंगापदस्य प्रवाहे प्रसिद्धत्वात्तत्र शक्तिस्तटे लक्षणा। यथा
राजसंबंधीपुरुषादित्यर्थे राजापुरुष इत्यस्याप्यस्ति प्रसिद्धिः निषादस्थपत्या
दिशब्दानां कर्मधारयतत्पुरुषबहुव्रीह्यादिसमासभेदेनाभिन्नार्थका[illegible]नां
तात्पर्याद्विशेषावगतिरिति न्यायात् क्व तात्पर्यमिति संदेहे संभवति सामा
नाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वमिति न्यायात् कर्मधारयलाभः। २५
वस्तुतस्तु तत्पुरुषकर्मधारयोर्लघीयानीतिन्यायो निर्मूलः। सुरपतिरित्या
त दौ सुराणां पतिरिति तात्पर्ये तत्पुरुषस्यैव प्रवृत्तेः। निषादस्थपतिं याजयेदि
त्यत्र तु लिंगदर्शनाच्चेति सूत्रे कूटं दक्षिणा कूटं हि निषादानामेवोपकार
कमिति लिंगोपन्यासात्। तात्पर्यनिर्णयः। ननु स्थपतिशब्दः स्वामिपर्या
यः श्रेष्ठपर्यायो वा उभयथापि गुणवचनत्वात् जातिगुणयोगे गुणस्यै

व पूर्वनिपातनियमात् कर्मधारये प्रयोगानुपपत्तिरिति चेन्न। तस्य राज
दंतादित्वात्।। किंच वषट्कर्तुः प्रथमभक्ष इत्यत्रानुवादेन प्राथम्यविधा
नापत्तिमाशंक्य प्रथमभक्षसमस्तमेकं पदं तत्र त्वेकप्रसवत्वान्नैकभ
क्षणमुद्दिश्य प्राथम्यविधानयुक्तमिति भक्षांतराविधिः। तथा अंगैः स्विष्ट
कृतं यजतीत्यत्र पशौ नोदकप्राप्तिः स्विष्टकृत्प्रधानहविर्भ्यो हृदयादि
भ्य एकादशभ्योपि कर्तव्यत्वेन प्राप्त इति त्र्यंगैरिति बहुवचनमंगानुवा
देन त्रित्वविनार्थमित्याशंक्यैकं हीदं समस्तं पदं तत्सर्वमुद्दिश्य विधे
यकं वा सुक्तमुत्तरार्धविधान एकप्रसरताभंगात् त्रित्वविशिष्टांगांत
रविधिरिति बोधलक्षणे व्यवस्थितमेकाधरभानेनाभ्युपगमेऽसंगतं
स्यात्। यत्तु समासयुक्तलक्षणाशून्योत्तरनामपदकत्वे सति लुप्तद्वि
तीयादिविभक्तिकपूर्वनामपदकसमासत्वं तत्पुरुषत्वं। पंचमूलीत्या
दिवारणाय सत्यंता नीलोत्पलादिवारणाय लुप्तेत्यादि। मत्वानयोस्त
त्पुरुषमिति वष्टं। मुख्यतत्पुरुषत्वाभावात्। तत्पुरुषसंज्ञाविधानं

अ

वृ. टी. तुब्राह्मणइत्यादौनकारलोपाद्यर्थेगौणं।अब्राह्मणमित्यादिवारणायपूर्वे
तीत्युक्तेः तुर्जैरामादयः तत्रपंचराजपरमराजइतिद्विगुकर्मधारयेमुख्यतत्पु
रुषत्वाभावेटच्प्रभावापत्तेः।गौणमुख्ययोरितिन्यायात् नलोननञ्इत्यस्यतत्
२६ पुरुषानपेक्षत्वेननलोपाद्यर्थेगौणमित्युक्तेरनुपयोगाच्च।किंचानुशा
सनानुशासितत्वेनसंज्ञाद्वयस्यापिमुख्यत्वेसंभवतिस्वेच्छामात्रेणगौण
त्वकल्पनस्यायुक्तत्वात्।अत्रेदंवक्तव्यं।नञ्तत्पुरुषस्यकर्मधारयत्वं
व्याकरणपरिभाषयाउतस्वपरिभाषया।नाद्यः।तथाहितत्पुरुषःसमाना
धिकरणःकर्मधारयइतिकर्मधारयलक्षणं।तत्रसामानाधिकरण्यंनामप्र
वृत्तिनिमित्तभेदेसतिएकार्थविशेष्यबोधजनकत्वं।तथाचाभेदसंबंधेनयत्रा २६
न्वयःसकर्मधारयः।अब्राह्मणइत्यादिनञ्तत्पुरुषेतुनञोभावोर्थःतथाच
भावप्रतियोगीब्राह्मणइत्यर्थः।एतेना — अतत्त्वभवसीत्यादिवुत्तरपदार्थप्राधा
न्यप्रयुक्तकार्यसिद्धिःब्राह्मणाभावइत्यादिबोधःउत्तरपदार्थप्राधान्यप्रयुक्तका
र्यसिद्धिरस्तुअकोरितिलिंगादितिबोध्यं।नचप्रतियोगितासंबंधेनान्वयेनामार्थयद्
तिन्यायेविरोधःनञोद्योतकत्वात्वाचकत्वपक्षेतुनिपातेतरसमासेतरत्वविलक्षणासो
कारात्।असमस्तनञस्तुनआश्रयेबान्वयात्।घटोनास्तीत्यघटाभिन्नाश्रयकास्ति
त्वाभावइतिबोधःनायंनैय्यायिकानामपितत्र।कर्मधारइतिव्यवहाराभावान्फला
भावाच्च।इत्थंहिनैय्यायिकसरणिःनञःसंसर्गाभावोन्योन्याभावार्थौ।तत्राद्यो द्विधा। प्रागभाव

प घः

प्रध्वंसाभावोत्यंताभावश्चेति॥विनाश्यभावत्वंप्रागभावत्वं॥जन्याभावत्वंध्वंसत्वं।त्रैकालिकसं
सर्गाभावत्वमत्यंताभावत्वं॥तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वं
॥तत्रात्यंताभावान्योन्याभावौनित्यौ॥नित्यत्वंचप्रागभावाप्रतियोगित्वेसतिध्वंसाप्रतियो
गित्वं॥एवंचाघटःपटइतिनञ्तत्पुरुषेघटस्यप्रतियोगितासंबंधेननञर्थेत्वाघ्रातिपदिक
तदर्थस्याभावनञ्पदेऽभेदेनैवान्वयः।तथाचपटप्रतियोगिकाभाववद्भिन्नःपटइतिबोधः
।ननुस्वर्गादिध्वस्तइतिवन्नसविशेषणेहिविधिनिषेधौविशेषणमुपसंक्रामतःसतिविशे
ष्यबाधइतिन्यायेनगौनित्येत्यादौनित्यत्वस्यगौत्वेनान्वयापत्त्यापदार्थःपदार्थेनेतिनियम
स्यावश्यकतयाऽनेनर्थाभाववदंशेभावेघटस्यप्रतियोगितासंबंधेनभावेन्वयेतस्यचैक
त्वात्घटोनास्तीतिप्रयोगापत्तिरितिचेन्न।भावनान्यथाभावप्रतियोगिनिसंख्यान्वयानि
यमात्।तत्रघटत्वावच्छिन्नप्रतियोगिताकाभावविषयकशाब्दत्वावच्छिन्नंप्रतिसमानाधि
करणपदासमभिव्याहृतघटपदज्ञानत्वेनकारणता॥तेननीलघटोनास्तीत्यत्रनघट लो
तुद्र त्वावच्छिन्नाभावधीःनपचतीत्यत्रपाकानुकूलकृत्यभाववांश्चैत्रइतिबोधःजातौसतानास्तीत्यत्र
जातिवृत्त्यस्तित्वाभाववतीसत्तेतिबोधः।नतुसंबंधसामान्यावच्छिन्नजातिवृत्तित्वाभावोवास
मवायसंबंधावच्छिन्नजातिवृत्तित्वाभावोवानाद्यः।अन्यमात्रस्यकालोपाधितयामूर्त्तमा
त्रस्यैवदिगुपाधितयाकालिकदैशिकविशेषणतयोस्तत्राऽसंभवेपिएकार्थसमवायित्वस्य
दिगु

स

वृ·टी· संभवात्। नांत्यः। प्रतियोग्यप्रसिद्धेः एवंजातिर्नसत्तावृत्तीरत्रापीतिचेत्। अयोग्यमेवेदंवाक्यमि
त्येके। सत्तापदंसत्तासमवायपरंसंयुपर्यत्वानुयोगित्वेंतथाचजात्यनुयोगिकत्वाभाववान्सत्ता
समवायइतिबोधइत्याहुः। अन्येतुजातिर्निरूपितत्वसाक्षात्संबंधावच्छिन्नवृत्तित्वाभावः प्रतीयतइ नि
त्याहुः। एतेनसमासप्रयुक्तलक्षणाशून्यतुल्याधिकरणनामद्वयघटितसत्वंकर्मधारयत्व
१७ मितितल्लक्षणंकृत्वानञ्समत्पुरुषस्यकर्मधारयत्वंवदंतोजयरामादयोमतद्वयेपितदभा
वादुपेक्ष्याः। द्विगुश्चेतिसूत्रविहितसंज्ञात्वमेवद्विगुत्वं। यत्तुसंज्ञाविषयान्यत्वेसतिसंख्यावाचक
पूर्वपदतुल्याधिकरणसमासोद्विगुः तद्धितार्थेविधेययथा। पंचकपालः। उक्तार्थत्वात्तद्धि
तप्रत्ययः। तद्धितविषयेथायेपंचानापत्तिः। अत्रसमासेनतद्धितार्थानभिधानात्तद्धितप्र
त्ययइत्याहुर्जयरामादयस्तन्न। पंचभिर्गोभिः क्रीतः पंचगुरित्यत्रापिसमासेनतद्धितार्थ
स्योक्तत्वात्तदनुत्पत्तौतस्यलुकिप्रयोगसिद्धौनिर्बाधायांतद्वान्त्यस्यव्यर्थत्वाच्च। बहुव्री
ह्यधिकारपठितसमासत्वंबहुव्रीहित्वं। सचतद्गुणोभेदेनद्विधा। तत्रतद्गुणत्वंनामवि तद्गुण
धेयान्वयिस्वघटकावयवार्थकत्वंयथालंबकर्णइत्यादौविधेयान्वयिस्वघटकावय
वार्थकत्वमतद्गुणत्वंयथाचित्रगुरित्यादौ। अत्रापिशक्तिरेवतेनेंद्रपीताद्यधिकरणं १७
संगच्छते। यत्तुनियमतः समासप्रयुक्तलाक्षणिकोत्तरपदकसमासोबहुव्रीहिः चित्रागो
र्यस्येतिवाक्याच्चित्राभिन्नागोस्वामिचैत्रादिस्वत्वाश्रयइतिबोधाद्गोपदेचित्रगोकत्ति

नि

स्वत्वप्रतियोगिकलक्षणाचित्रापदंतात्पर्यग्राहकं। यद्वागोपदंगोस्वामिनिलक्षणायएकदे
शेगविचित्राभेदान्वयः। यद्वागोपदशक्तिनाशक्त्यागवादिलक्षणयास्वाम्यादिर्बोध्यते। एकप या
दार्थयोरपिपरस्परमन्वयः। शोभनाचित्रागौश्चित्रपदस्यशोभनचित्रगोसंबंधिपरताशोभ गुरित्यत्र
नपदंचतात्पर्यग्राहकं। चैत्रदत्तधनइतिसमासेचैत्रकर्तृकदानकर्मधनसंबंधीमित्रइति
बोधः। आरूढोवानरोयमितिविग्रहेवृक्षवृत्तिउपरिदेशावच्छिन्नसंयोगानुकूलक्रियाश्रयो
वानरइतिबोधः। आरोहणकर्तृवानरसंबंधीवृक्षइतिबोधः। एषः समानाधिकरणबहुव्री
ला हिरित्याहुर्जयरामादयः लक्षणाश्रयणेतुविशिष्टेशक्तिरेवोचिता। नचलक्षणोत्वलिद्धी
यसी तत्पुरुषात्कर्मधारयोलघीयान्इतिसिद्धांतभंगापत्तेः। लक्षणैयांहिअनन्य न्य
लभ्योहिशब्दार्थइत्येवमूलं। तस्यलक्षणयालाभेशक्तिकल्पनमन्याय्यमितिनार्थः किं
तुसंसर्गादिनालाभेशक्तिकल्पनमन्याय्यम्। अथवाअनन्यलभ्यस्तात्पर्यग्रहादिनिर्वि
षयः शब्दार्थः शब्दशक्यः। नानार्थस्थलेतात्पर्यग्रहादिनाभिधानियममात्रंनतुशक्ये
तदपेक्षाच्चैत्रदत्तधनइत्यस्यसमानाधिकरणबहुव्रीहित्वंयदुक्तंतत्त्वयुक्तमेवेतिदि
१८ क्। चार्थेद्वंद्वः इतिसूत्रविहितसमासत्वंद्वंद्वत्वं। सद्व्यवहारविषयत्वंवातत्रसमुच्चया
न्वयेतरेतरयोगसमाहाराश्चार्थाः। तत्रसमुच्चयत्वनेकस्यैकधर्मावच्छिन्नेविशेष्यता
संबंधेनप्रकारतासंबंधेनप्रकारतासंबंधेनान्वयः। यथादेवदत्तः पचतिहसतिचवाइ

१२ वचनंतत्र। यथाधवखदिरौयथायत्रसंहतिःप्रधानंतत्रसमाहारः। संहतिःसाहित्यं। साहित्यस्यैकवचनमेव। तत्रनपुंसकलिंगता
नुशासनात्। यथाहस्त्यश्वंपाणिपादमित्यादौहस्तिनोश्वस्यचसाहित्यमित्याकारिकातत्रान्वयधीः। इत्थंचहस्त्य–

वृ. टी. श्वरंगुरुंचभजस्वेत्यादौएकदेववदत्राश्रयिकावर्तमानापचिक्रियाहसिक्रियाच। ईश्वरक
र्मिकागुरुकर्मिकावर्तमानाभजनक्रियेतिबोधः। अन्यतरस्यान्यनिष्यादकयत्ननिष्पाद्यत्वल धा
रूपेआनुषंगिकत्वेऽकत्वेन्वयः। यथाभिक्षामटगांचानयेत्यादौ। अत्रानुषंगिकभि
१८ क्षाटनव्याप्याभूमितिबोधः। परस्परनिरूपितसाहित्यवतामेकस्मिन्नन्वयइतरेतरयोगः।
यथाप्लक्षन्यग्रोधौ। सहितप्लक्षन्यग्रोधकर्मकंछेदनमितिबोधः। अत्रसाहित्यंविशेष
णम्। साहित्यंचाखंडोपाधिः। परस्परसापेक्षाणां तिरोहितावयवभेदःसमूहःसमाहारः।
अयंचविशेष्यः। यथापाणिपादं। तत्राद्ययोर्नसमासः। असमत्रापिविशिष्टशक्तिः। त
थाचविग्रहइवसमासेउक्तार्थत्वान्नसाहित्यसाहित्यबोधकचशब्दाप्रयोगः। एवंपुष्पवं
श्रेये तादिपदेसाहित्यमपिशक्यतावच्छेदकं। अतःएकयोक्त्यास्यैकशक्यतावच्छेदकप्रकारेणे
गं त्यर्थः। एवंचपुष्पवंतादिपदंचंद्रसूर्यौचशक्यौ। व्यासज्यवृत्त्यवच्छेदकतास्वीकारात्। एवंच १८
नततःएकतामात्रबोधनापिशक्यतानस्य। यच्चभूतलेघटपटौनस्तइत्यत्रभूतलवृत्त्यभावघ
द्वि टपटयोरुभयत्वावच्छिन्नप्रतियोगितासंबंधेनान्वयइतिद्विवचनस्यप्रयोगसाधुतामाचंद्रदाराःसंतीतिविदि
तिभावानंदाआहुः। तन्न। संभवत्यर्थसाधुत्वशब्दसाधुत्वस्यान्याय्यत्वमितिन्यायस्याकोषादिनादंपतेबाधसं
दा भवेपिद्वित्वांतिकेस्वेछामात्रेणतद्प्रयोगात्। दारास्तीतिवद्भूतलेपटपटनास्तीत्यपिप्रयोगानापत्तेश्च। यत्तुपरस्परा
न्वितसामासार्तेनिखिलपदार्थबोधकसमासत्वंद्वंद्वत्वम्। धवखदिरावित्यादौधवखदिरादिपदस्यधवखदिर
साहित्याश्रयेलक्षणयाधवखदिरादिशक्त्यावापरस्परानन्वितधवखदिरबोधकत्वाल्लक्षणासंगतिः। सचद्विधाःवि
इतरेतरयोगसमाहारभेदात्। यत्रावयवार्थप्राधान्यंतत्रेतरयोगःप्रधान्यविभक्त्यर्थान्वयित्वं। अतएववचनबहु
समा न्व द्वि

क्षमानमित्यादौसाहित्येसामानाधिकरण्यसंबंधेनकर्मत्वान्वयइतिप्राञ्चः। नव्यास्तु। हस्त्यश्व
मानयेत्यादौहस्त्यश्वपदशक्तिभ्यामेवहस्त्यश्वबोधकेनतुसाहित्यबोधकेलक्षणा। एक
वचनंत्वनुशासनबलात्। समाहारसंज्ञाचनदीसंज्ञावत्पारिभाषिकी। अतएवहस्त्यश्वमित्या
दौविनाद्व्यपदेलक्षणामन्वयबोधः। यदिचहस्त्यश्वंप्रमेयमित्यादौसमाहारबोधोऽनु
भवसिद्धस्तदालक्षणेत्याहुः। यत्तुसमुच्चयार्थचकारेणयत्रप्राधान्येनक्रियासंबंधोविव
क्षितोधवांश्छिंधिखदिरांश्छिंधिइत्यादौप्राधान्येनछिदाक्रियाभेदोयत्रचान्वाचयार्थ
चकारेणप्राधान्येनगुणभावेनसविवक्षितोधवंछिंधिसामर्थ्येखदिरंचेत्यादौ। यत्रसपु
त्रोगच्छतीत्यादौपुत्रस्यैकक्रियान्वयित्वेपिविशेषणत्वेनैवतदन्वयःतत्रद्वंद्वाभावः। साहि
त्यलक्षणायामेवनिर्वहति। तुल्यवदेकक्रियान्वयित्वसाहित्यस्योक्तेष्वभवात्। अतए
वचार्थेद्वंद्वइत्यत्रचार्थःसमुच्चयान्वाचयेतरोगृह्यते। अन्वाचयःसमाहारःइतरेतरःसमु
च्चयइत्यर्थचतुष्टयस्यचार्थत्वात्। समाहारःसाहित्यम्। इतरेतरःसाहित्यविशिष्टं। अत
एवयस्कर्मकर्तव्यंतदनयासहेत्यादावपिपत्न्यासहित्वं। नतुसाहित्यं। पत्न्याःकथंचि
दनुमितिद्वारेवापयोगेनव्यापरासाम्याभावात्। तत्रचैत्रमैत्रौस्तिष्ठतिगतिमंतावित्या
दियथासंख्यस्थलेएकक्रियान्वयित्वाभावेपिद्वंद्वादित्याकुर्जैरामादयः। तत्रराजपुरुषइ
त्यादौशक्तिभ्यांपरस्परानन्वितराजपुरुषबोधकबद्द्वंद्वेलक्षणातिव्याप्तेः। परस्परान्वया–

वृत्ति· टी· एवसमासइत्येतद्बोधकसमर्थःपदविधिरित्यनुशासनविरोधाच्च। अन्यथा धनंराज्ञःपुरु
षोभार्यायाइत्यादावपिषष्ठीसमासापत्तेः। यदपिरवदिरादिपदेलक्षणेत्युक्तं। तदपिन। विनि
गमनाविरहेण धवादिपदेपितत्स्वीकारात्। उभयत्रतत्स्वीकारेगौरवात्। नन्वप्रत्ययानांप्र
२९ कृत्यर्थान्वितस्वार्थबोधकत्वादव्यवहितपूर्वपदस्यैवप्रकृतित्वात्। तत्रलक्षणेतिवाच्यम्।
बकुपद्धरित्याद्यव्ययस्यास्त्रीपतीत्यादौक्रियांचतुर्थान्वयानुपपत्त्या अव्ययीभावेपूर्वपद
स्यद्वंद्वेउभयोः प्रकृतित्वमिति। भवतिसिद्धांतेनचाव्यवहितपूर्वपदस्यप्रकृतित्वमिति। वकु
मशक्यत्वात्। तस्माद्वत्ययविधानावधित्वमेवप्रकृतित्वं। यदपिनव्यास्तु। इत्यादीनापरिभा
षिकीत्यंतेननैयायिकनव्यमतमुपन्यस्तंदलंपिन। समाहारेवृत्यस्वीकारेघटपटमित्यादा
वेकवचनविधायकानुशासनाभावेनैकवचनानापत्तेः। समाहरणंसमाहारोऽनेकस्यैकी
रणमेकोधर्मइत्यन्वर्थमूलकसमाहारद्वंद्वइतिव्यवहारोच्छेदापत्तेश्च। नचनदीवध्यादि
संज्ञावत्समाहारसंज्ञापिपारिभाषिकीतिवाच्यम्। दृष्टांतेयूस्त्र्याख्यावितिपरिभाषासत्वे
पिदोर्षोतिकेतदभावात्। किंचद्वंद्वेसाहित्याभानानंगीकारेअग्नीषोमौइंद्राग्नीत्यादा ६
वेकदेवतात्वंनस्यात्। यदपियतित्यादिनाव्यापारसाम्याभावादित्यंतेननान्यग्रंथमु २९
पन्यस्यचैत्रमैत्रौस्तिष्ठितिगतिमंतावित्यादियथासंख्यस्थलेएकक्रियान्वयित्वाभावेपि
द्वंद्वादित्यनेनदूषयांचक्रुस्तदपिन। तादृशप्रयोगस्यसाधुत्वेप्रमाणाभावात्। असा

धुत्वेचलोचनाधरकृताहूतरागाविकृतादेरुध्वंतितेवर्धयतिचेदित्यादेरसाधुत्वमित्याद्यं
तौटंकितावितिसूत्रस्यभाष्यकैयटयोरवमानत्वात्। यदितादृशप्रयोगोपिप्रामाणिकस्त
५५ र्हिभवतइत्याध्याहारेणाबोध्याः। यत्तुघटकलशावित्यादिद्वंद्ववारणायपदार्थतावच्छेद
कभेदस्यैवद्वंद्वनियामकत्वान्नीलघटयोरैक्यांशिवरामयोरभेदइत्यादौनद्वंद्वानुपपत्ति
रित्यचुर्जेरामादयः॥ तन्न। वक्रदंडश्चकुटिलदंडश्चेत्यादौपदार्थतावच्छेदसत्वेनद्वंद्वाप
त्तेः। यदित्वत्रविरूपाणामित्यनुशासनेननिर्वाहंब्रूषेतर्हितंततएवघटकलशावित्यादि
वारणासंभवेपदार्थतावच्छेदकभेदस्यैवद्वंद्वनियामकत्वेफलाभावः। प्रत्युतनीलघटइति
कर्मधारयानापत्तिश्च॥ नचपदार्थतावच्छेदकभेदेद्वंद्वएवेतिननियमः। किंतुपदार्थताव
च्छेदकभेदएवद्वंद्वइतिनकर्मधारयानुपपत्तिरितिवाच्यं। समुच्चयस्यवक्तुमशक्यत्वात्।
तस्मात्पदार्थभेदेद्वंद्वःसामानाधिकरण्येसतिपदार्थतावच्छेदककर्मधारयः। नीलघटयो
रैक्यांशिवरामयोरभेदइत्यादौसमाससकालेसामानाधिकरण्येनान्वयाविलक्ष
णाद्वंद्वः। तत्वेनुकर्मधारयइतिविवेकः। यत्तुनचैवंघटावित्यादौद्वंद्वासंभवोत्तदवादकस ५
७ रूपशेषानुपपत्तिः। द्वंद्वविषयेएवतदुत्पत्तेरितिवाच्यम्। घटावित्यादौसरूपशेषानंगी
कारात्। एकेनापिघटपदेननानाघटोपस्थापनसंभवात्। सकृदुच्चरितइत्यादिनियमाभा
वात्॥ अन्यथापचतिइत्यादावप्येकंकोपपत्तेः। गंगायांघोषमत्स्यौस्तइत्याद्यनुरोधेन

वृत्ति· टी· युगपद्वृत्तिद्वयविरोधस्याप्यनंगीकारादेकेनद्वुरिपदेनसिंहत्वविधुत्वाभ्यांबोधसंभवा
त्। हराद्इत्यादौनैकशेषः हरिहराद्इत्यादिद्वंद्वाभावस्तुयदासारूप्यस्यापिद्वंद्वनियामकत्वा
२० त्। वस्तुतः सरूपाणामेकशेषएकविभक्ताविति सूत्रेएकविभक्तौक्वचन्भेदेएकशेषवि
धायकतयासार्थकं। नचसविभक्तिकस्यद्वंद्वोनिर्विभक्तिकस्यैवैकशेषइतिनेदंयुक्तं। द्वं क
द्वविषयेप्रवृत्तौद्वंद्वापवादकत्वायोगात्। प्रातिपदिकोत्तरविभक्तेरावश्यकत्वेनिर्वि
भक्तिकप्रातिपदिकद्वयासंभवात्। अन्यथाद्वंद्वादिसमासोनिर्विभक्तिकस्यैवस्यादितिस्
वुर्जयरामादयः॥ अत्रेदंवक्तव्यं। द्वंद्वापवादेकशेषइत्यत्रप्रामाणिकानुशासनंवाबीजं॥ना न्या
द्यः। तद्दृश्यन्यायस्यानुपलब्धेः फलाभावाच्च। नांत्यः। सरूपैकशेषानंगीकारादिवद
तोनुशासनानंगीकारात्। यदपिपचंतीत्यादावप्येकशेषापत्तेरित्युक्तंतदपिन। तत्रैश २०
पत्तौदोषाभावात्। अथवाख्यातभिन्नेतत्स्वीकारात्। यद्वाअत्रस्यैकस्यैकशेषंआ
पाद्यतेप्रत्ययांतस्यप्रकृतेर्वा। नाद्यः। अनुशासनेनहिविभक्तौप्रकृतिभागस्यतद्वि ग
धानात्। नांत्यः। प्रकृत्यर्थानेकत्वबोधकोहिसः। नचपचधातोस्तत्संभवति। क्रियायांविभक्त्य
ख्या र्थसंख्यान्वयायोगात्। यदपिहरिहरीद्वंद्वाभावस्तुयदासारूप्यस्यापिद्वंद्वनियामकत्वादित्यु
क्तंतदपिन। जननीपितृविपरिच्छेत्तृवाचिनोर्मातृशब्दयोः सारूप्येपिद्वंद्वदर्शनात्। यद
पिनचोपादिनांनिर्विभक्तिकैकशेषेद्वंद्वापवादकत्वायोगादित्यादिनादूषणाभिधानंतद

पिन। सविभक्तिकैकशेषस्वीकारेपिद्वंद्वापवादकत्वायोगस्यतदवस्थत्वात्। यदसारूप्यस्यद्वं
द्वनियामकत्वादितिपूर्वभवद्भिरेवोक्तत्वात्। असाहित्येद्वंद्वइतिनैय्यायिकनव्यमतेद्वंद्वाप
वादैकशेषइत्यस्यफलाभावाच्चप्रक्रियायांनिर्विभक्तिकप्रातिपदिकानेकत्वबाधकाभा
२६ वेननिर्विभक्तिप्रातिपदिकैयासंभवाच्चेतिदूषणस्यपरास्तत्वात्। निर्विभक्तिकैकशेषाति
बोधः। यदपिनिर्विभक्तिकप्रातिपदिकानेकत्वसंभवेद्वंद्वसमासोऽपिनिर्विभक्तिकस्यैवस्यादि
तिनिरंकुशतर्ककुशलैरुक्तं। तदपिन। तद्विधायकानुशासनाभावात्। किंचसविभक्तिकैक
शेषशिष्यमाणेएकवचनश्रवणप्रसंगादित्यादिदूषणानिग्रंथभूयस्त्वभयान्नेहतन्यते।
अत्रवैयाकरणाः एकशेषस्यद्वंद्वापवादत्वात्साहित्यप्रकारकबोधस्यानुभवाच्चसाहित्य
विशिष्टेशक्तिः अतएवसाहित्यप्रकारकबोधेएकशेषः तदभावेतंत्रंपुनः पुनरनुसंधाने
आवृत्तिरितितभेदेद्व्यवहारोप्युपपद्यते। तत्रतंत्रंद्विविधं। शब्दतंत्रमर्थतंत्रंच। अर्थ
भेदाच्छब्दभेदइतिनयेसकृदुच्चरितत्वोष्ठपुटव्यापाराच्छब्दोच्चारणेश्रोतुर्यत्रविनिगमनाविर
६ हाच्छब्दयज्ञानंतत्राद्यम्। अर्थभेदेपिशब्दैक्यमितिनयेसकृदुच्चारितत्वोष्ठपुटव्यापारप्रका क्य
शितैकशब्दविनिगमकाभावादनेकार्थबोधेद्वितीयम्। ननुद्वंद्वैकशेषयोः सविभक्ति
कनिर्विभक्तिकभेदसत्त्वात्कथमेकशेषस्यद्वंद्वापवादकतेतिचेन्नूनंयद्येकशेषोनस्यात्
तदाविभक्तिकस्यैवद्वंद्वस्यात्। कृतेत्वेकशेषेऽनेकाभावात्प्रसक्तिरिति तद्वदपवादत्वात्।
न्यु ६

यत्तु द्वंद्व इत्यस्य साधारणत्वेन समाहारद्वंद्वविषयेप्येकशेषाभावेन दुर्वारो द्वंद्वोऽत्रस्यादि
सूत्रं वैयाकरणनव्याः तन्न। द्वित्वबहुत्वविवक्षायां समाहारे कशेषे घटाविति प्रयोगापत्तेः
तस्माच्छब्दशक्तिस्वाभाव्यादिवैकशेषविषयेपि साहित्यविशेष्यकोबोधोनास्त्येवस्त्येव
२२ सारम्। तथा च न पूर्वोक्तानुपपत्तिः केचित्तु साहित्यं नाम सेनावनादिवदपेक्षाबुद्धिविषय
त्वम्। अत्र साहित्यबुद्धिरेव चापेक्षाबुद्धिः। अपेक्षतेसापेक्षा साहित्यं तद्विषया बुद्धिरित्य
र्थात्कर्मण्यपाङित्याङुः। नन्वेकशेषवीप्साद्विर्वचनयोः को भेद इति चेत् द्विर्वचनप्रत्येक
मेव व्यापकसंबंधप्रतीतिः ब्राह्मणाय ब्राह्मणाय शतं देहीत्यादौ। एकशेषे तु ब्राह्मणे
भ्यः शतं देहीत्यादौ प्रत्येकमेवेति न नियमः। तत्र हि वीप्साद्विर्वचने क्वचिदुद्देश्यतावच्छे
दकव्यापकत्वं विधेये प्रतीयते यथा पूर्वोदाहृते। तत्र। बुद्धिस्थब्राह्मणादिनिष्ठोद्देश्यकं
शतकर्मकं दानमिति बोधः। क्वचिद्विधेयव्यापकत्वमुद्देश्ये। ब्राह्मणेभ्यः शतं देही
त्यादौ क्वचित्स्फुटप्रतीतये उभयोरपि द्वित्वम्। यथा ब्राह्मणाय शतं देहीत्यादौ। एके २२
कस्य शतं शतानामिति च। गजे गजे न मौक्तिकमित्यादौ गजव्यापकत्वाभावो मौक्तिके
बोध्यते। अत्रेदं बोध्यम्। यत्र यत्पदे वीप्सा तत्र न तत्पदे सा वीप्सितस्यार्थस्य विशि
ष्टस्य नटपदेन परामर्शसंभवात्। अत एव कारकं चेद्विजानीयाद्यां यां मन्येत सा सा
भवेदित्युक्तं कथितं चेति सूत्रे भाष्ये। नन्वेवं ज्ञानानियस्य यस्यावः कार्यमुच्यते तं तं भजं

य

तइत्यत्राद्वैरितिसूत्रस्य भाष्यप्रयोगासंगतिः। तत्रैकांतरत्वापि द्वित्वाभावात्। किंतुभि
न्नभिन्नोयस्तन्त्रौक्यं बोद्धो भिन्नभिन्नैनैव रूपेण बुद्धिस्थ तत्तत्पदार्थपरामर्शकाविति सप्तमे काव्य
प्रकाशे स्फुटम्॥ केचित्तु स्पष्टत्वार्थं क्वचित् तत्पदेपि वीप्साद्विर्वचनमिच्छंतीति दिक्॥ अथ स्त्रीप्रत्य
यादीनामर्थो निरूप्यते। तत्र टाबादयः स्त्रीत्वस्य द्योतकाः न तु वाचकाः प्रकृत्यैवोक्तत्वात्। यत्तु न
च प्रातिपदिकार्थे एव स्त्रीत्वं तस्य च तदर्थ एव जात्यादिमत्त्विति विशेषणत्वेनान्वयः। स्त्रीप्रत्य
यास्तु द्योतकाः लिंगस्य च प्रातिपदिकार्थत्वं स्वभावस्यकमेव। न च ब्राह्मणः अपितु ब्राह्म
णीत्यादौ पुंस्त्वबोधकपदाभावेन तद्बोधानुपपत्तेः॥ ब्राह्मणादिपदाच्च जात्यादेरिव्यस्य
च भानं नियतमेव॥ लिंगभानं तु तात्पर्ययोग्यताधीनं क्वचित्कं ब्राह्मणीत्यादौ पुंस्त्वाद्यवबोधा
दिति वाच्यम्। उक्तयुक्त्या पुंस्त्वस्य प्रातिपदिकार्थत्वेप्यनंतानां प्रातिपदिकानां स्त्रीत्वार्थकत्वे
गौरवात्। लाघवेनात्मीयस्यां स्त्रीप्रत्ययानां तदर्थकत्वकल्पनौचित्यात्॥ अत एव स्त्रीत्व
संग्रहाय प्रातिपदिकार्थेत्यादिसूत्रे लिंगग्रहणं कृतं। अन्यथा प्रातिपदिकार्थ एवेदं तद्भवि त
न प्रकृतदुपादानानुपपत्तेः॥ क्वचित्तु स्त्रीप्रत्ययस्त्रियाभार्यत्वेन विशेष्यता बोधयति शू
द्रीत्यादौ॥ भार्यात्वं बंधविशेषः। तत्रैव निरूपकत्वेन प्रकृत्यर्थान्वयः। स्त्रीत्वं च योनिमत्त्वं।
खट्वादौ वीदेवतादिपदे च स्त्रीप्रत्ययानार्थबोधकाः। तत्र प्रकृत्यर्थे योनिमत्त्वाद्यतीतस्यायो
ग्यतयानन्वयादित्याशंकृगदाधरादयः॥ तन्न। श्रीरित्यादौ स्त्रीप्रत्ययाभावेपि स्त्रीत्व

वृ॰ दी॰ स्यप्रातिपदिकमात्रादिप्रतीतेस्तस्यापिस्त्रीत्वार्थकत्वंप्रत्ययस्यचइतिविपरीतगौरवापत्तेः॥
किंचस्त्रीप्रत्ययादीनांस्त्रीत्वार्थकत्वेणावस्त्रियामञितिस्त्रियमञिविहितेत्वाच्चक्रोशीत्या
दौउक्तनामप्रयोगाइतिङीपूनस्यात्। अपिच अजेत्यादौस्त्रीत्वस्यप्रत्ययार्थविशेषणत्वेनान्वयो या
२२ नस्यात्। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यप्राधान्यात्। नचेष्टापत्तिः। [illegible]स्त्रीत्वविशे टा
षणतयाबोधयंतीस्वग्रंथाविरोधात्। स्त्रीत्वविशिष्टाजेत्यनुभवविरोधाच्च॥ लिंगग्रहण
स्यप्रत्याख्यातत्वेतस्यवाचकत्वेसाधकोपन्यासवैयर्थ्याच्च। यदपिशूद्रीत्यादौभार्यात्वेन
बोधइत्युक्तंतदपिन॥ नहितत्रभार्यात्वेनैवबोधः अपितुकन्यात्वेनापिपुंयोगस्योभयत्रा
प्यविरोधात्॥ यदपिस्त्रीत्वंचयोनित्वमित्युक्तं॥ तत्रेदंवक्तव्यम्। किमिदंस्त्रीत्वंस्त्रियामित्य
त्रविवक्षितं॥ उतशास्त्रीयम्। नाद्यः। खट्वाटवीत्यादौयोनिमत्वस्त्रीत्वाभावेनस्त्रियामि २२
त्यधिकृत्यविहितटाबादीनामनुत्पत्तिप्रसंगात्॥ दारशब्देचतादृशस्त्रीत्वसत्वेनतदुत्पत्ति
प्रसंगाच्च॥ नांत्यः। खट्वाटवीत्याद्यनन्वयादित्युक्तस्योत्तरग्रंथविरोधात्। किंचटाबादी
नामनर्थकत्वकल्पनमनुचितमेव। संभवत्यर्थसाधकत्वेशब्दसाधुत्वस्यान्याय्यत्वमिति
न्यायविरोधात्। वैयाकरणोक्तलिंगप्रयुक्तकार्य्यविधौशास्त्रीयमेवलिंगंगृह्यते। यत्तु
तत्रलौकिकेऽसंभवेशास्त्रीयएव। तत्संभवेतुसामानाधिकरण्यसंबंधेनशास्त्रीयपवि[illegible]
ष्टेलौकिके। नतुकेवललौकिकेनापिकेवलशास्त्रीयेइत्यूचुर्वैयाकरणनव्याः॥ तन्नम

ना स्पो
क्षिकाइत्यत्रलौकिकसंभवेनपुंमक्षिकेटापूनस्यात्। ननुपशुंयजेतेत्यादौशास्त्रीयपुंस्त्वस्योभयसा
या धारण्येनपुंस्त्वस्यविवक्षितत्वान्नस्त्रियागइतिमीमांसकोद्घोषः कथंसंगच्छतेतिचेत्। नछागो धो२
वामंत्रवर्णादितिषष्ठेसाधिकरणेनतन्निर्णयात्। शास्त्रीयमपिलिंगंलौकिकलिंगव
च्छास्त्रबोधेभासतेतथैवानुभवात्। कोशादिप्रामाण्याच्च। भाष्येतुसत्वादीनामुपचयापच
यस्थितिरूपंपुंस्त्वस्त्रीत्वनपुंसकत्वमुक्तं॥ अथतद्धितार्थोनिरूप्यते। तत्राग्नेयमित्यादौदेव
ताविशिष्टद्रव्यंप्रत्ययार्थः॥ [illegible] तत्रप्रकृत्यर्थस्याभेदेनान्वयः तथाचाग्न्यभिन्नदेव
ती तासंबंधीतिबोधः। अथवाच्चाग्नि[illegible]देवतात्वनिरूपकप्रदेयमितिबोधः। प्रदेयदेव
तात्वनिरूपकतासंबंधेनान्वयः। नन्वेवंतद्धितेनचतुर्थ्यावामंत्रवर्णोवापुनः देवतासंमति
स्तत्रदुर्बलंतुपरंपरमितिमीमांसकोक्तंदौर्बल्यं। कथमितिचेत्। इत्थंतद्धितएकार्थीभाव
स्वीकारात्क्लृप्तित्वं। ब्राह्मणवदधीतइत्यादौब्राह्मणप्रतियोगिकसादृश्याध्ययनप्रतियो
गिकसादृश्यवदध्ययनमितिबोधः॥ शादितीवगायतीत्यादौवतिप्रत्ययः। अप्राप्ति
पदिकत्वात्। किंचसादृश्यविशेष्यकबुद्धिंप्रतिनामजन्योपस्थितेर्हेतुत्वात्॥ नतत्रसादृश्यमि
वार्थः। किंतुसंभवनात्मिकोत्प्रेक्षैव। तदुक्तंतत्सूत्रेभाष्येनवेतिउक्तेनोपमानमस्ति। अरविंद
दस्सुंदरंमुखमित्यत्रभवतिक्रियाध्याहारं। तथाचसुंदरारविंदभवनसदृशंसुंदरमुखभवनमि
तिबोधः॥ ब्राह्मणेनतुल्यास्यगौरित्यत्रनवतिः। उपमेयस्यक्रियात्वेनस्यप्रवृत्तेः। तत्रतस्येति

वृ॰ दी॰ बीतस्तगुणादितुल्येपि। मथुरावत्पाटलिपुत्रेप्रकारः मथुराप्रतियोगिकसादृश्यवत्पाटलिपु
त्रकेप्राकारइतिबोधः अत्रनमथुरादिपदंलक्षणीयं। किंतु अस्मादेवज्ञापकात् प्रथमार्थेसप्तमी।
२३ एवंघ्रेपि। अथवामथुरायामिवेत्यत्रप्रकाराध्याहारोबोध्यः॥ तथाचमाकारनिरूपिताधिक
रणत्वेसप्तमि। विधिवत्पूजयतइत्यत्रविधिकर्मकयोग्यताकर्तृहरिकर्मकंदेवदत्तव्यापारजन्यं
पूजानमितिबोधः। आनंदमयइत्यत्रप्रचुरानंदः। अथवप्रचुरानंदवानितिबोधः। तत्रप्रकृतवच
नेमयडित्यत्रभावेधिकरणेवाल्युट्। नचानंदमयशब्देनब्रह्मोच्यते। तस्यनिर्धर्मकत्वात् आ
२५ नन्दरूपत्वेनतदकरणत्वाभावाच्चकथंमयडितिचेन्न। निर्धर्मकस्यापिव्यावहारिकप्राचुर्य
६ पदार्थात्। राहोःशिरइत्यत्रषष्ठ्याईवैकत्वेआधाराधेयभावेबोधः। अतएवनिकार
शब्दान्नेतिचेत्प्राचुर्यादितिव्याससूत्रम्॥ अथावातदितियोविभागात्स्वार्थेमयट्॥ २३
अथवाचकतायाःस्फोटकतिष्ठत्वात्निरूप्यन्ते। वर्णस्फोटः।१। पदस्फोटः।२ वाक्यस्फो
टः।३ अखंडपदस्फोटः।४ अखंडवाक्यस्फोटः।५ इत्थंपंचव्यक्तिस्फोटाः। वर्णपदवा
क्यादिभेदेनत्रिविधोजातिस्फोटः। इत्थमष्टौस्फोटाः। सिद्धांतेवाक्यजातिस्फोटः। स्फुट
त्यर्थोयस्मादितिस्फोटः। वाचकइतियावत्॥ तत्रप्रकृतिस्सयत्योः पृथगर्थोपस्थापक
त्वेवर्णस्फोटः। अयंतुनैयायिकानामपिसंमतः। यत्रतुवस्तुनादेप्रकृतिप्रत्यययाज्ञा
प्र

ग्रं
नंतत्रपदस्फोटः। एवंहरेवेत्यादौपदयोर्विभागेनाज्ञानंतत्रवाक्यस्फोटः। एवमेकंपदमेकं
वाक्यमित्यबाधितप्रतीत्यावर्णातिरिक्तंवर्णाभिव्यंग्यंपदंवाक्यंचावश्यंस्वीकार्यं॥ तदेववाक्य
मित्यखंडस्फोटपदवाक्यस्फोटो॥ यत्त्वत्रनैयायिकाः। घटपटकीभूततावद्वर्णव्यंग्यःता
वतायद्वर्णाव्यंग्योवास्फोटः। नाद्यः। तृतीयक्षणवृत्तिध्वंसप्रतियोगिनांतदधिकरणक्षणे
त्रि ध्वंसाधिकरण।क्षणोत्पन्नानांवर्णानामेकक्षणावस्थायित्वरूपमेवनासंभवात्। नांत्यः॥ व
र्णानांनार्थप्रत्ययउपयोगित्वंकिंतुस्फोटप्रत्ययएव॥ रामायनमः कृष्णायनमः॥ रामरामः वा
तस्ययत्किंचिदेकवर्णेनैवोपपत्तेर्वर्णांतरोच्चारणस्यवैयर्थ्यात्॥ अथपूर्वपूर्ववर्णगो
चरसंस्कारसहितचरमवर्णेनैवोपलंभस्तद्व्यंजकइतिचेत्तर्हिसएवार्थप्रत्यायकोस्त्वि
कृतंस्फोटेन। अथनार्थप्रत्ययानुपपत्त्यातत्सिद्धिः। किंतुपदप्रतीतिबलादितिचेन्न। आ
नुपूर्वीविशेषविशिष्टनावद्वर्णरूपस्यैवपदत्वात्॥ आनुपूर्वीविशेषश्चोत्तराव्यवहित
त्वं। अव्यवहितोत्तरत्वंतद्व्यक्तिध्वंसाधिकरणध्वंसानधिकरणत्वेसतितद्व्यक्त्यधिकरणध्वंसा
यः नधिकरणत्वेसतितद्व्यक्त्यधिकरणध्वंसाधिकरणीभूतोक्षणस्तदुत्पत्तिकत्वं। यद्यप्येतस्य
तत्तद्व्यक्तिघटितत्वादननुगमस्तथापिस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वघवत्त्वंबोध्यम्॥
तेनघटोत्पत्तोनसार्थप्रत्ययः॥ भवानदीनसरोरसजराजाजेत्यादीनामविशेषापत्तिरित्या
कुः। तन्न। सोयमित्यबाधितप्रतीत्याशब्दोनित्यः। व्योमैकगुणत्वात्। तत्परिमाणवदित्यनु
पटे दी

वृ॰ दी॰ मानेनचवर्णानांनित्यत्वेसिद्धेउत्पन्नोगकारः विनष्टइत्यनित्यत्वसाधकप्रतीतिर्भ्रमत्वकल्पना
न्तु। नचलाघवात्प्रतीतिद्वयभ्रमकल्पनापेक्षयासोयमित्येकप्रतीतेरेवभ्रमत्वंकल्प्यतइति
२४ वाच्यम्। अनंतप्रागभावतत्ध्वंसकल्पनेविपरीतगौरवापत्तेः। तस्मादात्मनःआकाशःसंभूत
इत्यादिश्रुत्याकाशस्यापिउत्पत्तिप्रलयश्रुत्याकाशस्याप्यनित्यत्वप्रसंगः नचसंभूतइत्यस्या
विर्भूतइत्यर्थः वर्णेष्वपितथावक्तुंशक्यत्वात्। तथाचोत्पन्नोनष्टइतिप्रतीत्यावर्णेष्वनित्यत्व
माकाशेनेतिनयुक्तिमत्। अतएवभाष्यकारप्राभाकरभट्टानांवर्णेषुनित्यत्वव्यवहारः एवं
चमेलनासंभवादितिपूर्वोक्तदूषणमपास्तं। नन्वेस्तुवर्णानांनित्यत्वंतथापिफलाभावात्त
दतिरिक्तः स्फोटोनस्वीक्रियतइतिचेन्नतदेवेदंघटपदंतदेवेदंवाक्यमेकंपदमेकंवाक्यमि
त्यबाधितप्रतीत्यातत्सिद्धेः अन्यथाघटपटादीनामवयवातिरिक्तावयव्यसिद्धिप्र
संगः नचेष्टापत्तिः भवत्सिद्धांतभंगापत्तेः इत्थंनिरूपिताः पंचव्यक्तिस्फोटाः सोपदत्वेन
तुराक्ततावच्छेदिकाजातिरेववाचिकेत्युक्तम्। जातिश्चाविधकोधर्मविशेषः तथाचवर्णजा
तिस्फोटः पदजातिस्फोटः वाक्यजातिस्फोटइतितन्मतेस्फोटत्रयम्। इतिश्रीमन्मौनिकुल २४
तिलकायमानगोवर्द्धनभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टकृतावृत्तिदीपिकास
माप्ता॥ ॥ जम्नोपाभिधस्येदंपुस्तकं ७२२